अथ अच्सन्धिः

१५. **इको यणचि ६/१/७७**

इकः स्थाने यण् स्यादचि संहितायां विषये। सुधी+उपास्यः इति स्थिते

१६. **तस्मिन्निति निर्दिष्टे पूर्वस्य १/१/६६**

सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम्।

१७. **स्थानेऽन्तरतमः १/१/५०**

प्रसङ्गे सति सदृशतमः आदेशः स्यात्। सु ध् य् + उपास्यः इति जाते।

सन्धिः मेलनम्। द्वयोः वर्णयोः यत्र मेलनं भवति, तत्र एकस्य वर्णस्य उभयोः वा ध्वनिपरिवर्तनं सामान्यतया जायते। यत्र उभौ वर्णौ स्वरौ भवतः, तयोः मेलनं स्वरसन्धिः अच्सन्धिः वा उच्यते। तत्र प्रथमं तावत् यण्सन्धिः विचार्यते–

१५. **इको यणचि** – इकः यण् अचि इतिच्छेदः। इकः इति षष्ठ्यन्तं पदम् उद्देश्यम्। यण् इति प्रथमान्तं विधीयमानत्वात् विधेयभूतम्। अचि इति सप्तम्यन्तं निमित्तम्। यत् क्रियते तत् विधेयम्, यस्य क्रियते तद् उद्देश्यम्, यत्सम्बन्धेन क्रियते तद् निमित्तम्। इक् इति प्रत्याहारः, तत्र 'इ उ ऋ ऌ' इति वर्णाः। यण् इत्यपि प्रत्याहारः तत्र 'य व र ल' इति वर्णचतुष्कम्। अच् प्रत्याहारे 'अ इ उ ऋ ऌ ए ओ ऐ औ' इति वर्णाः। वर्णानाम् अतिशयितसन्निधिविषये इकः स्थाने यण् विधीयते अचि परे इति सूत्राशयः। 'सुधी+उपास्यः इत्यवस्थायाम् क्रमशः उ, ई, उ इति वर्णत्रयम् इक्रूपम्, तेभ्यश्च परतः क्रमशः ई, उ आ इति अच्प्रत्याहारगताः वर्णाः सन्ति। अतः एतादृश्याम् दशायां कतमस्य इकः स्थाने यण् विधेयः इति शंकायाम् – व्यवस्थापकं परिभाषासूत्रम् अवतारयति – **तस्मिन्निति।**

१६. **तस्मिन् इति निर्दिष्टे पूर्वस्य** इतिच्छेदः। इदं परिभाषासूत्रम्। अस्य अयमर्थः–सप्तमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेण व्यवधानशून्यस्य पूर्वस्य उद्देश्यस्य कर्तव्यम्। 'इको यणचि' इत्यत्र 'अचि' इति सप्तमीनिर्देशः। सुधी+उपास्यः इत्यत्र अचः (निमित्तात्) व्यवधानशून्यः पूर्ववर्ती इक् धकारोत्तरवर्ती ईकारः एव अस्ति। 'अतः' तस्यैव यण् विधेयः नान्ययोः इकोः, तयोः अचः अव्यवहितपूर्वत्वाभावात्।

अत्र पुनः शंका – उद्देश्यविषये जातेऽपि समाधाने विधेयविषये पुनः प्रश्नः – यण् इति प्रत्याहारे 'यवरलाः' इति चत्वारः वर्णाः सन्ति। तत्र ईकारस्य स्थाने एषु कतमः विधेयः? सर्वे वा पर्यायेण स्युः? अतः व्यवस्थाकपम् अन्यत् परिभाषासूत्रं – ''स्थानेऽन्तरतमः'' इति अवतारयति।

१७. 'स्थाने' इत्यस्य 'प्रसङ्गे' इत्यर्थः। एकस्य स्थानिनः स्थाने बहूनाम् आदेशानां प्राप्तिप्रसङ्गे स्थानिना अन्तरतमः=सदृशतमः आदेशः विधेयः इति व्यवस्था। प्रकृतप्रयोगे ईकारस्य स्थाने यवरलेषु यकार एव यण् भवति, ईकारयकारयोः स्थानकृतसादृश्यात्। इत्थं 'सुधी+उपास्यः' इत्यत्र उक्तपरिभाषासूत्रद्वयसहायतया ''इको यणचि'' इति सूत्रेण ईकारस्य स्थाने यकाररूपे यणादेशे कृते 'सु ध् य् + उपास्यः' इति स्थितिः जाता। मधु+अरिः इत्यत्र उकारस्य सदृशतमः वकारः, धातृ+अंशः इति ऋकारस्य सदृशतमः रकारः, ऌ+आकृतिः इत्यत्र ऌकारस्य सदृशतमः लकाररूपयणादेशः भवति। अतः मध्वरिः, धात्रंशः, लाकृतिः इत्यादयः प्रयोगाः सिध्यन्ति।

१८.	**अनचि च ८/४/४७**
अच: परस्य यरो द्वे वा स्त: न त्वचि। इति धकारस्य द्वित्वेन सुध्ध्य्
उपास्य: इति जाते।

१९.	**झलां जश् झशि ८/४/५३**
स्पष्टम्। इति पूर्वधकारस्य दकार:।

२०.	**संयोगान्तस्य लोप: ८/२/२३**
संयोगान्तं यत्पदं तदन्तस्य लोप: स्यात्।

२१.	**अलोऽन्त्यस्य १/१/५२**
षष्ठीनिर्दिष्टोऽन्त्यस्याल: आदेश: स्यात्। इति यलोपे प्राप्ते
(यण: प्रतिषेधो वाच्य:) सुद्ध्युपास्य: । मद्ध्वरि: । धात्त्रंश: । लाकृति: ।

१८.	अत्र 'यरोऽनुनासिकेऽनुनासिको वा' इति सूत्रात् 'यर:' 'वा' इति पदद्वयम् ''अचोरहाभ्यां द्वे' इति सूत्रात् च 'अच:' 'द्वे' इति पदद्वयम् अनुवर्तते। न अचि इति अनचि अर्थात् अज्भिन्ने वर्णे। अच: परस्य यर: विकल्पेन द्वित्वं भवति अज्भिन्ने अर्थात् व्यञ्जने वर्णे परे इति सूत्राशय:। यर् इति प्रत्याहार: तत्र 'ह' वर्णं परित्यज्य सर्वाणि व्यञ्जनानि भवन्ति। सुध् य् + उपास्य: इत्यत्र उकारात् परस्य धकाररूपस्य यर: अनेन सूत्रेण द्वित्वं भवति यतो हि तस्मात्पर: अज्भिन्न: वर्ण: यकार: विद्यते। अत: सु ध् ध् य् + उपास्य: इति स्थिति:।

१९.	**झलां जश् झशि** इति सूत्रं स्पष्टार्थकम्, अत: स्पष्टम् इति उक्तम्। झल्प्रत्याहारगतानां वर्णानां स्थाने जश् = ज ब ग ड द एषु यथायोग्यं आदेश: भवति, झशि = झ भ घ ढ ध ज ब ग ड द इत्येतेषु वर्णेषु परेषु सत्सु। अनेन सूत्रेण सु ध् ध् य् इत्यत्र पूर्वधकाररूपस्य झल: स्थाने तवर्गतृतीय: दकाररूप: जशादेश: विधीयते द्वितीये धकारे (झशि) परे। अत: सुद्ध् य् + उपास्य: इति दशा सञ्जाता। तत्र ...

२०.	संयोगान्तस्य पदस्य लोप भवति इत्यर्थकेन अनेन सूत्रेण सम्पूर्णस्य सुद्ध्य् इति पदस्य लोप: प्राप्त:, अस्य संयोगान्तत्वात्। अत: सम्पूर्णस्य लोप: न स्यात् एतदर्थम् अन्यां व्यवस्थां सम्पादयन् परिभाषासूत्रमवतारयति – 'अलोऽन्त्यस्य' इति ---

२१.	**अल: अन्त्यस्य** इतिच्छेद:। विधीयमान: आदेश:, विधिसूत्रे षष्ठ्यन्तपदेन निर्दिष्टस्य = बोधितस्य य: अन्त्य: अल्, तस्य अल: (अन्त्यस्य अल:) स्थाने स्यात् इति सूत्रस्याशय:। 'संयोगान्तस्य लोप:' इति विधिसूत्रम्। अत्र षष्ठ्यन्तं पदं 'संयोगान्तस्य' इति, एतेन निर्दिष्टं सु द् ध् य् इति पदम्, अस्य च अन्त्य: अल् यकार:, तस्य स्थाने विधायकसूत्रेण विधीयमान: लोपात्मक: आदेश: स्यात्। इत्येवं सुद्ध् य् इत्यत्र यकारस्य लोप: प्राप्त:। 'यण: प्रतिषेधो वाच्य:' इति वार्तिकेन अन्त्यस्य यण: लोप: प्रतिषिध्यते। अत: सुद्ध्य् इत्यत्र अन्त्यस्य यकारस्य यण्त्वात् लोपनिषेधात् सुद्ध्युपास्य: इति सिद्ध्यति।

रूपसिद्धिलेखनप्रकार: –

सुधी+उपास्य: इत्यत्र ''तस्मिन्निति निर्दिष्टे पूर्वस्य'' ''स्थानेऽन्तरतम:'' इति सूत्रद्वयसहकारेण ''इको यणचि'' इति सूत्रेण धकारात्परस्य ईकारस्य यणि यकारे कृते सु ध् य् + उपास्य: इति जाते 'अनचि च' इति सूत्रेण 'धकारस्य विकल्पेन द्वित्वे कृते सुध् ध् य् + उपास्य: इति स्थिते ''झलां जश् झशि'' इति सूत्रेण पूर्वधकारस्य जश्त्वेन दकारे कृते सु द् ध् य् + उपास्य: इत्यवस्थायाम् ''अलोऽन्त्यस्य''

२२.	**एचोऽयवायावः ६/१/७८**

एचः क्रमादय् अव् आय् आव् एते स्युरचि।

२३.	**यथासङ्ख्यमनुदेशः समानाम् २/३/१०**

समसम्बन्धी विधिर्यथासंख्यं स्यात्। हरये। विष्णवे। नायकः। पावकः।

इति सूत्रसहायतया ''संयोगान्तस्य लोपः'' इत्यनेन सूत्रेण अन्त्यस्य यकारस्य लोपे प्राप्ते ''यणः प्रतिषेधो वाच्यः'' इति वार्तिकेन निषेधे कृते वर्णसम्मेलने सति सुद्ध्युपास्यः इति रूपं सिद्धम्। द्वित्वाभावपक्षे सुध्युपास्यः इति द्वितीयं रूपं निष्पन्नम्। एवमेव–मधु+अरिः – म ध् व् अरिः – मध् ध् व् अरिः – मद्ध्व्अरिः – मद्ध्वरिः, मध्वरिः इति। धातृ + अंशः – धातृर्+अंशः – धा त् त् र् + अंशः – धात्त्रंशः, धात्रंशः। लृ+आकृतिः– ल्+आकृतिः–लाकृतिः इत्यादि रूपाणि सिध्यन्ति।

अन्यानि उदाहरणानि –

प्रति+एकम् = प्रत्येकम्। हरि+अनुभवः हर्यनुभवः। यदि + अपि = यद्यपि। तरु+अरिः = तर्वरिः। गुरु+आगमनम् = गुर्वागमनम्। चारु+अङ्गी=चार्वङ्गी। सु+आगतम्=स्वागतम्। पितृ+आज्ञा=पित्राज्ञा। कर्तृ+आयुः=कर्त्रायुः। लृ+अनुबन्धः=लनुबन्धः। घस्लृ+आदेशः = घस्लादेशः इत्यादीनि रूपाणि।

२२.	**एचः अय् अव् आय् आवः** इतिच्छेदः। अत्र 'इको यणचि' इति सूत्रात् 'अचि' इति पदम् अनुवर्तते। एचः (ए ओ ऐ औ) इति उद्देश्यभूताः, अयादयःचत्वारः विधेयाः 'अचि' इति निमित्तपदम्। अतः अचि परे एचः स्थाने अयादयः स्युः इति सूत्रार्थः। अत्र चत्वारः स्थानिनः चत्वार एव आदेशाः। तत्र प्रथमस्य द्वितीयः, द्वितीयस्य प्रथमः अन्यः वा न स्याद् एतदर्थं व्यवस्थापकं सूत्रम् अवतारयति – यथासंख्यमिति–

२३.	**यथासङ्ख्यम् अनुदेशः समानाम्।** समाः=समानसंख्याकाः सम्बन्धिन उद्देश्यविधेयाः स्थान्यादेशाः वा। यस्य सः विधिः=समसम्बन्धी विधिः, तत्र आदेशाः यथासंख्यं = क्रमशः स्युः। अर्थात् 'एचोऽयवायावः' इत्यत्र एच् इत्यस्य 'ए ओ ऐ औ' इति यः क्रमः, तदनुसारमेव अयादयः अपि क्रमशः स्युः। अतः प्रथमस्य एकारस्य अय्, द्वितीयस्य ओकारस्य अव्, तृतीयस्य ऐकारस्य आय्, चतुर्थस्य औकारस्य आव् आदेशः भवति इति व्यवस्था।

उदाहरणानां विश्लेषणम् –

हरे + ए, विष्णो + ए, नै+अकः, पौ+अकः इत्यत्र पूर्वत्र क्रमशः ए, ओ, ऐ औ सन्ति, तेभ्यः परतः अच्वर्णाः क्रमशः ए, ए, अ, अ इति सन्ति। अतः एचः स्थाने क्रमशः अय् अव् आय् आव् आदेशाः भवन्ति। अतः हर् अय् ए, = हरये, विष्ण् अव् ए = विष्णवे, न् आय् अकः = नायकः, प् आव् अकः=पावकः इति रूपाणि सिध्यन्ति।

रूपसिद्धिलेखनप्रकारः –

हरे + ए इत्यत्र ''यथासंख्यमनुदेशः समानाम्'' इति सूत्रसहकारेण ''एचोऽयवायावः'' इति सूत्रेण रकारात् परस्य एकारस्य स्थाने अय् आदेशे कृते हर् अय् ए इति स्थितौ वर्णसम्मेलने कृते 'हरये' इति रूपं सिद्धम्। एवमेव विष्णो+ए – विष्ण् अव् ए – विष्णवे। नै + अकः – न् आय् अकः = नायकः। पौ+अकः = प् आव् अकः = पावकः।

२४. **वान्तो यि प्रत्यये ६/१/७९**
यकारादौ प्रत्यये परे ओदौतोरव् आव् एतौ स्तः। गव्यम्। नाव्यम्।
(अध्वपरिमाणे च) गव्यूतिः।

२५. **अदेङ्गुणः १/१/२**
अत् एङ् च गुणसंज्ञः स्यात्।

२६. **तपरस्तत्कालस्य १/१/७०**
तः परो यस्मात् स च तात्परश्चोच्चार्यमाणसमकालस्यैव संज्ञा स्यात्।

अन्यानि उदाहरणानि –

कपे+ए = कपये, रवये। रामे+ओः = रामयोः। भानो+ए = भानवे, गुरवे। गौ+औ =गावौ। रै+औ=रायौ इत्यादीनि।

२४. 'यि' इति 'प्रत्यये' इति पदस्य विशेषणम्। 'यि' इत्यस्य यकारादौ इत्यर्थः। यकारः आदौ यस्य स यकारादिः। तादृशे यकारादौ प्रत्यये परे ओत् = ओकारस्य औत् = औकारस्य च स्थाने वान्तादेशौ भवतः। कौ वान्तौ ? इति जिज्ञासायां वक्तव्यम् – 'एचोऽयवायावः' इत्यत्र ये चत्वारः आदेशाः अयादयः सन्ति, तेषु अव् आव् इति द्वौ वान्तौ स्तः, तौ अत्र ग्राह्यौ। अतः ओकारस्य औकारस्य च क्रमशः अव् आव् एतौ स्तः यकारादौ प्रत्यये परे इति सूत्रार्थः फलितः।

उदाहरणस्य विश्लेषणम् –

गो + यम्, नौ + यम् इत्यत्र ओकारात् औकारात् च परौ 'यम्' इति शब्दौ, तत्र यः यकारः स प्रत्ययस्य अस्ति उभयत्रापि। अतः यकारादिप्रत्ययः परः वर्तते, अतः ओकारस्य अव् आदेशः औकारस्य च आव् आदेशः भवति। अतः ग् अव् यम् = गव्यम् इति, न् आव् यम् = नाव्यम् इति रूपद्वयं सिद्ध्यति।

रूपसिद्धिलेखनप्रकारः –

गो + यम् इत्यत्र 'वान्तो यि प्रत्यये' इति सूत्रेण गकारोत्तरस्य ओकारस्य स्थाने अवादेशे कृते ग् अव् यम् इति जाते वर्णसम्मेलने च कृते गव्यम् इति रूपं सिद्धम्। नौ+यम् इत्यत्र औकारस्य आव् आदेशे न् आव् यम् = नाव्यम् इति रूपम्।

वार्तिकम् – (अध्वपरिमाणे च) अध्वा = मार्गः, तस्य परिमाणविशेषे वाच्ये यूतिशब्दे परे गोशब्दस्य यः ओकारः, तस्य अवादेशः वक्तव्यः इति वार्तिकाशयः।

गव्यूतिः गो+यूतिः इत्यत्र ''अध्वपरिमाणे च' इति वार्तिकेन यूतिशब्दे परे ओकारस्य अवादेशे कृते 'ग् अव् यूतिः' इति स्थितौ वर्णसम्मेलने 'गव्यूतिः' इति रूपं निष्पन्नम्।

विशेषः – गव्यूतिः इति क्रोशद्वयस्य वाचकः। क्रोशद्वयस्य अध्वपरिमाणविशेषत्वात् गव्यूतिशब्दस्यापि मार्गपरिमाणवाचकत्वमेव।

२५. गुणसंज्ञाविधायकं सूत्रम् एतत्। अत् = ह्रस्वः अकारः एङ् = ए ओ इति च गुणसंज्ञका भवन्ति, अर्थात् 'अ' ए ओ इति वर्णत्रयम् अस्मिन् शास्त्रे 'गुणः' उच्यते। एषां त्रयाणां वर्णानां गुणसंज्ञा अस्ति इति भावः। गुणेन एषाम् एव ग्रहणं भविष्यति इति तात्पर्यम्।

अत्र प्रश्नः 'अदेङ् गुणः' इत्यत्र 'अत्' इत्येवं तकारसहितस्य अकारस्य ग्रहणं किमर्थम् ? कथन्न 'अ एङ् गुणः' इत्येवं सूत्रं रचितम् ? अतः उत्तरति सूत्रद्वारा – 'तपरस्तत्कालस्य' इति

२६. **'तपरः तत्कालस्य'** इतिच्छेदः। तपरः इति पदे द्वौ समासौ बहुव्रीहिः तत्पुरुषश्च। तः परः यस्मात् स तपरः, बहुव्रीहिः अयम्। तात्परः तपरः इति पञ्चमीतत्पुरुषः। इत्थं तपरशब्दस्य अर्थद्वयं भवति तः परः यस्मात् सः, तात्परश्च यः, स तत्कालस्य संज्ञा = बोधकः भवति। तत्कालस्य इत्युक्तेःकिम् ? तपरत्वेन उच्चार्यमाणः

२७. **आद् गुणः ६/१/८७**

अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात्। उपेन्द्रः। गङ्गोदकम्।

यः वर्णः, तस्य यः कालः, तत्कालेन सदृशः कालः यस्य, तस्यैव तपरः संज्ञा इति। यथा 'अदेङ् गुणः' इत्यत्र'अ' इति तपरः, तः परः यस्मात् इति बहुव्रीहिं समाश्रित्य तथा एङ् इत्यपि तपरः, तात्परः इति तत्पुरुषमाधारीकृत्य। अतः 'अ' इति तपरः, स्वसमानकालस्यैव बोधकः। अस्य च एकमात्रिकत्वात् ह्रस्वसंज्ञकत्वात्, अयम् अकार ह्रस्वमूलकानां षण्णाम् एव अकारादीनां बोधकः अतः ह्रस्व अकार एव गुणसंज्ञकः, न पुनः दीर्घप्लुतौ अपि। एवमेव 'एङ् इति अपि तपरः। अतः स अपि स्वसमकालस्य एव संज्ञा। अत्र च एङ् इति 'ए ओ' द्वौ वर्णौ। एतौ ह्रस्वौ न भवतः, स्वभावतः दीर्घौ। अनयोः तपरत्वात् एतौ दीर्घाणाम् षण्णां भेदानां बोधकौ, न प्लुतानामपि। अतः दीर्घयोः एव 'ए ओ' इत्यनयोः गुणसंज्ञा, न प्लुतयोः इति व्यवस्था। एषा च व्यवस्था तपरत्वेन एव विहिता। यदि हि अत्र सूत्रे तपरत्वं नाकरिष्यत् तदा तु 'अणुदित्सवर्णस्य चाप्रत्ययः' इति सूत्रदिशा अकारेण अष्टादशानां ग्रहणात् आकारस्यापि गुणसंज्ञा, एङ् इत्यनेन च द्वादशानां ग्रहणात् ए ओ प्लुतयोः अपि गुणसंज्ञा अभविष्यत् इति भावः।

२७. आत् इति 'अ' इत्यस्य पञ्चम्येकवचनम्। 'अ' इति अविधीयमानत्वात् सवर्णान् ग्राहयति अतः अकारात् आकारात् च अचि परे पूर्वपरयोः (पूर्वस्य अकारस्य परस्य च अचः) स्थाने गुणरूपः एकादेशः भवतिः। एकादेशः इत्युक्तेः द्वयोः स्वरयोः स्थाने एकःस्वर भवति। स च किंरूपः ? अत उच्यते गुणरूपः। गुणः किंरूपः? अ ए ओ इत्येतेषु अन्यतमरूपः 'अदेङ्गुणः' इति सूत्रात्।

उदाहरणविश्लेषणम् -

उप+इन्द्रः = उपेन्द्रः। गङ्गा + उदकं=गङ्गोदकम्। उप+इन्द्रः इत्यत्र ''आद्गुणः'' इत्यनेन गुणः विधीयते। कयोः स्थाने ? पूर्वपरयोः। कौ पूर्वपरौ ? पकारोत्तरवर्ती अकारः इन्द्रशब्दस्य आदौ स्थितः इकारश्च पूर्वपरौ, तयोः स्थाने गुणरूपः एकादेशः विधेयः। 'अदेङ् गुणः' इति सूत्रात् 'अ ए ओ' इति गुणसंज्ञकं वर्णत्रयम्। अत्र पूर्वपरयोः स्थाने एषु त्रिषु कतमः गुणः स्यात् ? इति प्रश्ने 'स्थानेऽन्तरतमः' इति सूत्रानुसारं सदृशतमः आदेशः स्यात्, इत्युत्तरम्। अत्र हि पूर्वपरयोः स्थानिनोः अकार - इकारयोः क्रमशः कण्ठः तालु इति उच्चारणस्थाने स्तः। प्रसङ्गप्राप्तेषु गुणसंज्ञकेषु 'ए' इत्यस्य कण्ठतालु स्थानम्। अतः ताभ्यां स्थानिभ्यां तुल्यः एकाररूपः गुणः एव भवति अतः उप् (अ+इ = ए)न्द्रः = उपेन्द्रः इत्येवं रूपम् निष्पद्यते। गङ्गोदकम् इत्यत्र गङ्गा+उदकम् इति पदच्छेदे आकार-उकारयोः क्रमशः कण्ठः औष्ठौ च स्थाने स्तः, गुणसंज्ञकेषु च ओकारस्य कण्ठोष्ठस्थानत्वात् तयोः स्थाने ओकाररूपः गुणैकादेशः भवति।

रूपसिद्धिलेखनप्रकारः -

उपेन्द्रः - उप+इन्द्रः इत्यत्र ''अदेङ्गुणः'' इति सूत्रेण 'अ ए ओ' इत्येतेषां गुणसंज्ञायां कृतायाम् ''आद्गुणः'' इति सूत्रेण पकारोत्तरवर्तिनः अकारस्य इन्द्रशब्दगतस्य इकारस्य च स्थाने एकाररूपे गुणे एकादेशे (एकाररूपगुणैकादेशे) कृते उप् ए न्द्रः = उपेन्द्रः इति सिद्धम्।

अन्यानि उदाहरणानि -

रमा+ईशः = रमेशः, गण+ईशः=गणेशः, महा+ईशः=महेशः महेन्द्रः, नरेन्द्रः, महा+उपाध्यायः = महोपाध्यायः, कुल+उद्भवः = कुलोद्भवः, कुल+उत्पन्नः = कुलोत्पन्नः, जल+उद्गमः = जलोद्गमः। पर्व+उत्सवः= पर्वोत्सवः, विवाहोत्सवः इत्यादीनि।

२८. **उपदेशेऽजनुनासिक इत् १/३/२**

उपदेशेऽनुनासिकोऽजित्संज्ञः स्यात्। प्रतिज्ञानुनासिक्याः पाणिनीयाः।लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा।।

२९. **उरण् रपरः १/१/९१**

ऋ इति त्रिंशतः संज्ञेत्युक्तम्। तत्स्थाने योऽण् स रपरः सन्नेव प्रवर्तते। कृष्णर्द्धिः। तवल्कारः।

---

२८ **उपदेशे अच् अनुनासिक इत्** इतिच्छेदः। उपदेशः आद्योच्चारणम् इति 'हलन्त्यम्' इति सूत्रे प्रपञ्चितम्। उपदेशे य अनुनासिकः अच् स इत्संज्ञः भवति इति सूत्रार्थः। आद्याः पाणिन्यादयः क्व क्व अचः अनुनासिकान् कृतवन्तः ? कथञ्च आधुनिकैः ज्ञातुं शक्यते यदसौ अच् अनुनासिक इति? अत आह – 'प्रतिज्ञानुनासिक्याः पाणिनीयाः' इति। अर्थात् गुरुशिष्यपरम्परया ज्ञायते यदयमच् अनुनासिकः, अयञ्च अननुनासिकः इति। परम्परागतः येषाम् अचाम् इत्संज्ञा लोपश्च क्रियमाण अस्ति, ते वर्णाः पाणिनिना प्रोक्ताः अनुनासिकधर्मवन्तः सन्तीति अभ्युपगच्छन्ति आधुनिकाः इति भावः। लण् इति षष्ठे माहेश्वरसूत्रे लकारात्परः यः अकारः तस्य अनुनासिकत्वप्रतिज्ञया इत्संज्ञां विधाय ('उपदेशेऽजनुनासिक इत्' सूत्रेण) तेन इता सह उच्चार्यमाण हयवरट् सूत्रस्थः 'र् अ' इत्येवं रकारः (रप्रत्याहारः) मध्यगस्य लस्य, स्वस्य च संज्ञा=बोधकः सन् र् ल् इति वर्णद्वयं ग्राहयति। अर्थात् र ग्रहणेन रकारस्य लकारस्य च उभयस्य ग्रहणं भवति इत्याशयः।

२९. ऋ इति वर्णस्य षष्ठ्येकवचने उः इति रूपम्। उः अण् रपरः इति सूत्रस्य पदच्छेदः। रः परः यस्मात् सः रपरः। ऋ इति त्रिंशद्भेदानां संज्ञा इति पूर्वमुक्तम् अस्ति। अष्टादशभेदाः ऋकारस्य, द्वादश लृकारस्य। तयोः ऋलृवर्णयोः सावर्ण्यात् ऋकारः आत्मनः, सवर्णिनश्च लृकारस्य आहत्य त्रिंशद्भेदान् ग्राहयति। अतः ऋस्थाने (लृस्थाने च) यस्य अणः (अ इ उ) विधानं भवति, स अण् रपरः सन् तत्र प्रवर्तते। रपरः इत्यत्र 'र' इति पूर्वोक्तदिशा प्रत्याहारः रलयोः बोधकः। अतः ऋस्थाने विधीयमानः अण् रपरः भवति, लृकारस्य स्थाने विधीयमानः अण् लपरः भवति इति व्यवस्था।

उदाहरणविश्लेषणम् –

कृष्ण + ऋद्धिः इत्यत्र 'आद्गुणः' इत्यनेन अकारऋकारयोः स्थाने विधीयमानः अकाररूपः गुणैकादेशः ऋकारस्य स्थाने विधीयमानत्वात् रपरः सन् कृष्ण् अर् द्धि इत्येवं प्रवर्तते, वर्णसम्मेलने रेफस्य च जलतुम्बिकान्यायेन ऊर्ध्वगमने कृष्णर्द्धिः इति सिद्धिः भवति। एवमेव

तव+लृकारः इत्यत्र ऋकारेण लृकारस्य अपि सावर्ण्यवशात् ग्रहणेन गुणैकादेशे अकाररूपे तव् अ कारः इत्यत्र 'उरण् रपरः' इत्यनेन रकारेण लकारस्यापि ग्रहणात् लपरत्वे तव् अल् कारः इति जाते वर्ण सम्मेलने तवल्कारः इति रूपं सिध्यति।

रूपसिद्धिलेखनप्रकारः –

१. कृष्णर्द्धिः –

कृष्ण+ऋद्धिः इत्यत्र ''अदेङ् गुणः'' इत्यनेन 'अ ए ओ' इति वर्णत्रयस्य गुणसंज्ञात्वात् 'आद्गुणः' इति सूत्रेण णकारोत्तरवर्तिनः अकारस्य ऋद्धिशब्दगतस्य ऋकारस्य च स्थाने अकाररूपे गुणैकादेशे '' ''उरण् रपरः'' इति सूत्रेण रपरत्वे च कृते कृष्णअर् द्धिः इत्यवस्थायां वर्णसम्मेलने रेफस्य जलतुम्बिकान्यायेन ऊर्ध्वगमने 'कृष्णर्द्धिः' इति सिद्धम्।

२. तवल्कारः–

तव+लृकारः इत्यत्र 'आद्गुणः' इति सूत्रेण वकारोत्तरवर्तिनः अकारस्य लृकारस्य च उभयोः स्थाने 'अ ए ओ' इति गुणसंज्ञकेषु अकाररूपे गुणैकादेशे ''उरण् रपरः'' इति सूत्रेण लपरत्वे तव् अल् कारः वर्णसम्मेलने च कृते तवल्कारः इति रूपं निष्पन्नम्।

३०. **लोपःशाकल्यस्य ८/३/१९**

अवर्णपूर्वयोः पदान्तयोर्यवयोर्लोपो वाऽशि परे।

३१. **पूर्वत्रासिद्धम् ८/२/१**

सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धम्। हर इह, हर यिह। विष्ण इह, विष्णविह।

अन्यानि उदाहरणानि -

देव+ऋषिः = देवर्षिः। महा+ऋषिः = महर्षिः। ग्रीष्म + ऋतुः = ग्रीष्मर्तुः। सप्त + ऋषयः = सप्तर्षयः। मम : लृकारः = ममल्कारः। ह्रस्वस्य + लृकारस्य = ह्रस्वस्यल्कारः

३०. पदस्य अन्ते स्थितयोः अवर्णपूर्वयोः यकारवकारयोः अशि परे शाकल्यस्य मते लोपः भवति। अश् इति प्रत्याहारः अइउण् इत्यकारादारभ्य जबगडदश् इति शकारं यावत्। पाणिनिमते तु लोपः न भवति, अतः वैकल्पिकः अयं लोपः। यथा हरे+इह, विष्णो + इह इत्यत्र ''एचोऽयवायावः'' इति क्रमशः अयादेशे अवादेशे हरय् + इह, विष्णव् + इह इत्यवस्थायां पदान्तयोः अवर्णपूर्वकयोः यवयोः विभाषया लोपः भवति अशपरकत्वात्। इह इत्यत्र इ इति अश्। जाते च तयोः लोपे हर इह, विष्ण इह इति स्थितिः, अत्र ''आद्गुणः'' इति गुणः प्राप्तः अवर्णात् परे अचः स्थिततत्वात्। किन्तु गुणः न भवति, किं कारणं न भवति ? अत आह - पूर्वत्रासिद्धमिति।

३१. **पूर्वत्रासिद्धम्** - अष्टाध्याय्याम् अष्टौ अध्यायाः सन्ति। तत्र अष्टमाध्यायस्य प्रथमपादं यावत् सपादसप्ताध्यायी इति उच्यते। अन्तिमं पादत्रयं त्रिपादी इति कथ्यते। सपादसप्ताध्यायीस्थं सूत्रं प्रति त्रिपादीस्थं शास्त्रं = सूत्रम् असिद्धं भवति। अर्थात् त्रिपादीसूत्रेण विहितमपि कार्यं सपादसप्ताध्यायीस्थसूत्रदृष्ट्या अनस्तित्ववद् भवति। त्रिपाद्यामपि पूर्वतनं सूत्रं प्रति परं सूत्रमसिद्धं भवति। अतः अष्टाध्याय्याः अन्तिमं सूत्रं सर्वेषां सूत्राणां दृष्ट्या असिद्धम्। हर इह, विष्ण इह इत्यत्र यकारवकारयोः लोपविधायकस्य ''लोपः शाकल्यस्य'' सूत्रस्य त्रिपादीस्थत्वात् सप्तादसप्ताध्यायीस्थम् ''आद्गुणः''इति सूत्रं प्रति असिद्धत्वात् यलोपे वलोपे जाते अपि गुणः न भवति,'आद्गुणः' इति दृष्ट्या यकारवकारयोः तत्र स्थिततत्वात् - (अस्तीति भावनया) अवर्णात् परतःअचः अभावात्। यत्र च पक्षे यकारवकारयोः लोपः न भवति, तस्मिन् पाणिनिपक्षे हरयिह, विष्णविह इति स्थितिः।

रूपसिद्धिलेखनप्रकारः -

हरे इह इत्यत्र ''एचोऽयवायाव'' इति सूत्रेण पदान्ते स्थितस्य एकारस्य अयादेशे कृते हरय् + इह इति जाते सति ''लोपः शाकल्यस्य'' इति सूत्रेण अपूर्वकस्य पदान्तस्य यकारस्य विकल्पेन लोपे कृते हर इह इति स्थिते ''आद्गुणः इति सूत्रेण अकार-इकारयोः गुणैकादेशः तु न भवति, 'लोपःशाकल्यस्य' इति सूत्रस्य त्रैपादिकत्वात् तत्कृतस्य य्लोपस्य 'आद्गुणः' इति सपादसप्ताध्यायीस्थसूत्रं प्रति असिद्धत्वात्, अतः हर इह इति रूपम्। यलोपाभावपक्षे तु हरयिह इति रूपं सिद्धम्। एवमेव - विष्णो + इह - विष्णव् + इह - विष्णइह, विष्णविह।

अन्यानि उदाहरणानि -

वर्धते+एव = वर्धत एव, वर्धतयेव। लक्ष्म्यै+उद्यतः=लक्ष्म्या उद्यतः, लक्ष्म्यायुद्यतः। गुरौ+आदरः = गुरा आदरः गुरावादरः। विधौ+उदिते = विधा उदिते, विधावुदिते इत्यादीनि।

३२. **वृद्धिरादैच् १/१/१**

आदैच्च वृद्धिसंज्ञः स्यात्।

३३. **वृद्धिरेचि ६/१/८८**

आदेचि परे वृद्धिरेकादेशः स्यात्। गुणापवादः। कृष्णैकत्वम्। गङ्गौघः। देवैश्वर्यम्। कृष्णौत्कण्ठ्यम्।

---

३२. वृद्धिसंज्ञासूत्रम् इदम्। आत् ऐच् (आ ऐ औ) इति वर्णानां वृद्धिसंज्ञा भवति। ऐच् इति प्रत्याहारः। अत्र तपरकरणात् 'आ' इति, ऐच् (ऐऔ) इति च समकालस्यैव संज्ञा। अतः दीर्घस्य आकारस्य, वृद्धिसंज्ञा भवति, न तु ह्रस्वप्लुतयोः अकारयोः, न च प्लुतयोः ऐकारौकारयोः इति फलितम्।

३३. **वृद्धिरेचि** - आत् (अवर्णात्) एचि परे पूर्वपरयोः स्थाने वृद्धिरूपः (आ, ऐ औ इत्येतेषु अन्यतमरूपः) एकादेशः भवति। अवर्णात् अचि परे गुणः भवति (आद्गुणः)। एच् अपि अजन्तर्गतः अतः एचि परे अपि गुणः अपि प्राप्नोति, किन्तु वृद्धिः गुणापवादः।

उदाहरणस्य विश्लेषणम् -

कृष्ण+एकत्वम् इत्यत्र णकारोत्तरवर्तिनः अकारात् परः एकाररूपः एच् वर्तते, उभयोः स्थाने 'ऐ' इति वृद्धि रूपः एकादेशः भवति, अतः कृष्णैकत्वम् इति रूपम्। एवमेव गङ्गा+ओघः इत्यत्र अकारस्य ओकारस्य च स्थाने 'औ' इति वृद्धिः। देव+ऐश्वर्यम् इत्यत्र अ+ऐ = ऐ आदेशे, देवैश्वर्यम् तथा कृष्ण+औत्कण्ठ्यम् इत्यत्र अ+औ = औ आदेशे 'कृष्णौत्कण्ठ्यम्' इति रूपं निष्पद्यते।

रूपसिद्धिलेखनप्रकार :

कृष्णैकत्वम् - कृष्ण+एकत्वम् इत्यत्र 'वृद्धिरादैच्' इति सूत्रेण 'आ ऐ औ' इत्येषां वृद्धिसंज्ञायां कृतायां ''वृद्धिरेचि'' इति सूत्रेण (णकारोत्तरवर्तिनः अकारस्य ततः परस्य एकारस्य च इत्येवम् उभयोः) पूर्वपरयोः स्थाने आन्तरतम्यात् = सदृशतमत्वात् ऐकाररूपे वृद्ध्येकादेशे कृते कृष्ण् + ऐ + कत्वम् इति जाते वर्णसम्मेलने च कृते 'कृष्णैकत्वम्' इति रूपं सिद्धम्।

कृष्णौत्कण्ठ्यम् -

कृष्ण+औत्कण्ठ्यम् इत्यत्र वृद्धिसंज्ञायां ''वृद्धिरेचि'' इति सूत्रेण अकार-औकारयोः पूर्वपरयोः स्थाने सादृश्यात् औकाररूपे वृद्ध्येकादेशे कृष्ण्+औ+त्कण्ठ्यम् इत्यवस्थायां वर्णसंयोजने कृते ''कृष्णौत्कण्ठ्यम्'' इति रूपं सिद्धम्।

अन्यानि उदाहरणानि -

जन+एकता = जनैकता, धन+एषणा = धनैषणा। शाल्य + ओदनः = शाल्यौ दनः। विप्र + ऐक्यम् = विप्रैक्यम्। मत+ऐक्यम् = मतैक्यम्। धार्मिक + ऐतिहासिकम् = धार्मिकैतिहासिकम्। तव+औदासीन्यम् = तवौदासीन्यम्। अस्य + औत्सर्गिकत्वम् = अस्यौत्सर्गिकत्वम्।

३४. **एत्येधत्यूठ्सु ६/१/८९**

अवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात्। उपैति। उपैधते। प्रष्ठौहः। एजाद्योः किम् ? उपेतः। मा भवान् प्रेदिधत्। (अक्षादूहिन्यामुपसंख्यानम्) अक्षौहिणी सेना।

(प्रादूहोढोढ्येषैष्येषु)। प्रौहः, प्रौढः, प्रौढिः, प्रैषः, प्रैष्यः। (ऋते च तृतीयासमासे)। सुखेन ऋतः सुखार्तः। तृतीयेति किम् ? परमर्तः। (प्रवत्सतरकम्बलवसनार्णदशानामृणे)। प्रार्णम्, वत्सतरार्णम् इत्यादि।

---

३४. **एति+एधति+ऊठ्सु** इतिच्छेदः। एति, एधति इति क्रमशः इण् धातोः एध धातोः शितपा निर्देशः, न तु तिङन्तं रूपम्। तिङन्ते तु एधते इति आत्मनेपदम्। ऊठ् इति सम्प्रसारणरूपम्। अत्र 'वृद्धिरेचि' इति पूर्वसूत्रात् 'एचि' इति, 'आद्गुणः' सूत्रात् 'आत्' इति च अनुवर्तते। एचि इति इणेधोः धात्वोः विशेषणम्। अतः अवर्णात् एजादौ इण्धातौ परे, एजादौ एधधातौ ऊठि च परे पूर्वपरयोः वृद्धिरेकादेशः भवति इति सूत्रार्थः फलितः।

उदाहरणस्य विश्लेषणम् -

उप+एति, उप + एधते इत्यत्र अवर्णात् परेः क्रमशः एजादिः इण्धातुः, एजादिः एधधातुश्च वर्तते। अत्र 'एङि पररूपम्' इति प्राप्तं पररूपं प्रबाध्य पूर्वपरयोः अकार-एकारयोः स्थाने आन्तरतम्यात् ऐकाररूपः वृद्ध्येकादेशः भवति। अतः उपैति, उपैधते इति रूपे सिध्यतः। ऊठः उदाहरणं तु प्रष्ठौहः इति। अत्र हि प्रष्ठ+ऊहः इत्यत्र पूर्वपरयोः आन्तरतम्यात् औकाररूपवृद्धिः भवति।

अत्र प्रश्नः - इणेधधात्वोः एज् (एजादि) इति विशेषणं किमर्थम् (एजाद्योः किम्) ? उत्तरति-एजादौ इति विशेषणाभावे, यत्र एतौ धातू एजादी न स्तः, तत्रापि वृद्धिः प्राप्नोति। सा च वृद्धिः तत्र न स्यात्, एतदर्थं विशेषणम्। क्व एतौ एजादी न स्तः ? उप+इतः, मा भवान् प्र+इदिधत् इत्यत्र एतौ एजादी न स्तः। अत्र क्रमशः इणः लटि प्रथमपुरुषद्विवचने रूपम्, ण्यन्तस्य एधः लुङि प्र.पु. एकवचने रूपम्। कृते विशेषणे तु उक्त प्रयोगयोः एजादित्वाभावात् वृद्धिः न भवति। अतः गुणैकादेशे उपेतः, प्रेदिधत् इति रूपे स्तः।

वार्तिकम् -

(अक्षादूहिन्यामुपसंख्यानम्) - अक्षशब्दात् 'ऊहिनी' शब्दे परे वृद्धिः भवति इति वक्तव्यम्। अक्ष+ऊहिनी इत्यवस्थायाम् अकारात् अचि परे 'आद्गुणः' इति गुणस्य प्राप्तिः, स च गुणः न स्यात् अतः विशेषवचनम् एतत्। गुणः किमर्थं न स्यात् ? सति गुणे का हानिः ? अत्र वक्तव्यम् - वाङ्मये तादृशं रूपं न मिलति। यद्रूपं मिलति तत् 'अक्षौहिणी' इति वर्तते। एतदर्थं वृद्ध्यर्थं विशेषवचनरूपं वार्तिकं कृतमिति भावः।

वार्तिकम -

प्रादूहोढो. इति। 'प्र' इत्यस्मात् ऊहः, ऊढः, ऊढिः एषः, एष्यः, इत्येतेषु शब्देषु परेषु पूर्वपरयोः वृद्धि : एकादेशः स्यात् इति वक्तव्यम्। प्र+ऊहः, प्र+ऊढः, प्र+ऊढिः इत्यत्र 'आद्गुणः' इति गुणः प्राप्तः, तं बाधि तुं वृद्ध्यर्थं विशेषवचनम्। प्र+एषः, प्र+एष्यः इत्यत्र 'एङिपररूपम्' इति पररूपस्य प्राप्तिः आसीत्, तस्य बाध नाय च एतद्वार्तिकरूपं विशेषवचनम्। अतः उक्त स्थलेषु पूर्वपरयोः वृद्ध्येकादेशे क्रमशः प्रौहः, प्रौढः, प्रौढिः, प्रैषः, प्रैष्यः इति रूपाणि सिध्यन्ति।

वार्तिकम् -

'ऋते च.' इति। तृतीयातत्पुरुषसमासे अवर्णात् ऋत इति शब्दे परे पूर्वपरयोः वृद्धिः स्यात्। सुखेन ऋतः सुखार्तः इत्युदाहरणम्। 'सुख+ऋतः' इत्यत्र प्राप्तं गुणं बाधितुं वार्तिकमेतत्। अस्य अभावे तु गुण एव स्यात्। **अत्र अयं प्रश्नः**-तृतीयासमासे इति किमर्थम् उच्यते ? कथन्न समासे इत्येवम् उच्यते ? उत्तरम्-तृतीया इति कथनस्य अभावे यस्मिन् कस्मिन् अपि समासे अवर्णात् ऋत शब्दे परे सति गुणं प्रबाध्य वृद्धिः एव स्यात्, तादृशीं स्थितिं वारयितुं तृतीयासमासे इत्युक्तम्। परमश्चासौ ऋतश्च इति कर्मधारये परम+ऋतः इत्यत्रापि अवर्णात् ऋतस्य परत्वात् वृद्धिः न भवेत् एतदर्थं तृतीयासमासे इति वचनम्। अत्र च तृतीयासमासत्वाभावात् नास्य वार्तिकस्य प्रवृत्तिः भवति। अतः पूर्वपरयोः गुणैकादेशे रपरत्वे च कृते 'परमर्तः' इति रूपं सिध्यति। तृतीयासमासे तु वृद्धि :, अतः 'सुखार्तः' इति रूपम्।

३५. **उपसर्गाः क्रियायोगे १/४/५९**

प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः। प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप एते प्रादयः।

३६. **भूवादयो धातवः १/३/१**

क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः।

३७. **उपसर्गादृति धातौ ६/१/९१**

अवर्णान्तादुपसर्गाद् ऋकारादौ धातौ परे वृद्धिरेकादेशः स्यात्। प्रार्च्छति।

वार्तिकम् -

''प्रवत्सतर.'' इति। प्र, वत्सतर, कम्बल, वसन, ऋण, दश इति एतेभ्यः अकारान्तेभ्यः ऋणशब्दे परे वृद्धिः स्यात् इति वक्तव्यम्। प्र+ऋणम्, वत्सतर+ऋणम् इत्यादौ 'आद्गुणः' इति गुणः प्राप्तः, तं प्रबाध्य अनेन वार्तिकेन पूर्वपरयोः स्थाने आन्तरतम्यात् आकाररूपे वृद्ध्येकादेशे रपरत्वे च विहिते प्रार्णम्, वत्सतरार्णम्, कम्बलार्णम्, वसनार्णम्, ऋण+ऋणम्=ऋणार्णम्, दशार्णम् इति रूपाणि निष्पद्यन्ते।

अन्यानि उदाहरणानि -

प्र+एति=प्रैति। प्र+एधाञ्चक्रे=प्रैधाञ्चक्रे। प्र+एधताम्=प्रैधताम्। विश्व+ऊहः = विश्वौहः। प्र + ऐधत = प्रैधत, प्र + एधिषीष्ट = प्रैधिषीष्ट इत्यादीनि।

३५. वृद्धिप्रसङ्गे ''उपसर्गादृति धातौ'' इत्यत्र, पररूपप्रसङ्गे च 'एङि पररूपम्' इत्यादौ च धातोः उपसर्गस्य च कार्यविषयत्वात्, तत्र कः उपसर्गसंज्ञकः, कश्च धातुसंज्ञकः इति संभविष्यज्जिज्ञासायामाह - ''उपसर्गाः क्रियायोगे'' इति - अद्रव्यार्थकाः प्रादयः निपाताः क्रियायोगे = क्रियया अन्वये (सम्बन्धे) सति उपसर्गसंज्ञकाः भवन्ति। के प्रादयः ? इति जिज्ञासायामाह - प्र परा इत्यादयः द्वाविंशतिः प्रादयः।

३६. **भूवादयो धातवः** - क्रियावाचिनः भ्वादयः धातुसंज्ञकाः भवन्ति। भूश्च वाश्च इति भूवौ। आदिश्च आदिश्च इति आदी। भूवौ आदी येषां ते भूवादयः। अत्र प्रथमः आदिशब्दः प्रभृतिवाचकः तस्य च भूशब्देन सम्बन्धः।द्वितीयश्च आदिशब्दः प्रकारवाचकः (सादृश्यवाचकः) तस्य च वा शब्देन सह सम्बन्धः। अतः वासदृशाः क्रियावाचकाः भूप्रभृतयः धातुसंज्ञकाः भवन्ति इति सूत्रार्थः फलितः। क्रियावाचकाः धातुसंज्ञका भवन्ति, अतः विकल्पार्थकस्य वा शब्दस्य पृथिवीवाचकस्य भूशब्दस्य च धातुसंज्ञा न भवति, अनयोः क्रियावाचकत्वाभावात्।

३७. प्रादिषु उपसर्गेषु ये अकारान्ताः प्र, अप, अव इत्यादयः। तादृशात् अवर्णान्तात् उपसर्गाद् ऋकारादौ धातौ परे पूर्वपरयोः वृद्ध्येकादेशः स्यात् ऋकारादौ धातौ परे सति इति सूत्रार्थः। । तद्यथा 'प्र+ऋच्छति' इत्यत्र 'प्र' इत्यस्य क्रियायोगात् उपसर्गसंज्ञा, ऋच्छति इत्यस्य क्रियावाचकत्वात् धातु संज्ञा अस्ति। अयञ्च उपसर्गः अकारान्तः, धातुश्च यः उपसर्गात्परः स ऋकारादिः वर्तते। अतः अत्र पूर्वपरयोः स्थाने आकाररूपे वृद्ध्येकादेशे रपरत्वे च प्रार्च्छति इति रूपम्।

३८. **एङि पररूपम् ६/१/९४**

आदुपसर्गाद् एङादौ धातौ परे पररूपमेकादेशः स्यात्। प्रेजते। उपोषति।

३९. **अचोऽन्त्यादि टि १/१/६४**

अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात् (शकन्ध्वादिषु पररूपं वाच्यम्) तच्च टेः। शकन्धुः। कर्कन्धुः। मनीषा। आकृतिगणोऽयम्। मार्तण्डः।

रूपलेखनप्रकारः -

प्र+ऋच्छति इत्यत्र 'ऋच्छति' इत्यस्य क्रियावाचकत्वात् -भूवादयो धातवः' इति सूत्रेण धातुसंज्ञायां क्रियायोगाच्च ''उपसर्गाः क्रियायोगे' इति सूत्रेण 'प्र' इत्यस्य उपसर्गसंज्ञायाञ्च कृतायाम् ''आद्गुण'' इति गुणे प्राप्ते तं प्रबाध्य ''उपसर्गादृति धातौ'' इति सूत्रेण पूर्वपरयोः (उपसर्गस्थ-अकारस्य धातोः आदौ स्थितस्य ऋकारस्य च) स्थाने आकाररूपवृद्ध्येकादेशे 'उरण् रपरः' इत्यनेन रपरत्वे च कृते प्र्+आर्+च्छति इत्यत्र वर्णसम्मेलने च कृते 'प्रार्च्छति' इति रूपं सिद्धम्।

अन्यानि उदाहरणानि :- उपार्च्छति इत्यादीनि।

३८. अवर्णान्तात् उपसर्गात् एङादौ धातौ परे पूर्वपरयोः स्थाने पररूपमेकादेशः स्यात्। एतादृशे स्थले यद्यपि ''वृद्धिरेचि'' इति सूत्रेण वृद्धेः प्राप्तिः भवति तथापि एङादौ धातौ तु पररूपं भवति, न वृद्धिरिति स्थितिः।

उदाहरणस्य विश्लेषणम् -

प्र+एजते, उप+ओषति इत्यत्र क्रमशः प्र, उप इत्येतौ अकारान्तौ उपसर्गौ स्तः, ततः परौ क्रमशः एजते, ओषति इति एङादी धातू स्तः। अत्र एचि परे 'वृद्धिरेचि' इति वृद्धेः प्राप्तिः भवति तथापि अनयोः एङादिधातुत्वात् अनेन विशेषसूत्रेण (अपवादेन) परस्य यद् रूपं, तत् पूर्वपरयोः स्थाने एकादेशत्वेन आदिश्यते। अतः प्रेजते, उपोषति इति रूपं भवति (न तु प्रैजते, उपौषति इति)।

रूपलेखनप्रकारः -

प्र+एजते इत्यत्र 'एजते' इत्यस्य क्रियावाचकत्वात् 'भूवादयो धातवः' इत्यनेन धातुसंज्ञायां क्रियायोगात् 'प्र' इत्यस्य ''उपसर्गाः क्रियायोगे'' इत्यनेन उपसर्गसंज्ञायाम् ''वृद्धिरेचि'' इति सूत्रेण वृद्ध्येकादेशे प्राप्ते तम्प्रबाध्य ''एङि पररूपम्' इति सूत्रेण पूर्वपरयोः स्थाने पररूपैकादेशत्वेन एकारे कृते 'प्रेजते' इति रूपं सिद्धम्। एवमेव उपोषति इत्यपि ज्ञेयम्।

अन्यानि उदाहरणानि-

प्र+एजाञ्चक्रे = प्रेजाञ्चक्रे। प्र+एजति (कम्पने) = प्रेजति।

प्र+ओणति = प्रोणति, प्रोणाञ्चकार (ओणृ अपनयने) इत्यादीनि।

३९. **अचः अन्त्यादि टि** इतिच्छेदः। 'अचः' इति निर्धारणे षष्ठी, जातौ एकवचनम्। वर्णसमुदाये शब्दे यावन्तः अचः भवन्ति, तेषाम् अचां मध्ये यः अन्तिमः अच्, सः अन्तिमाच् यस्य समुदायस्य आदिः, स समुदायः (अज्झल्समुदायः अज्रूपः वा समुदायः) टिसंज्ञकः भवति। यथा 'मनस्' इति शब्दे अज्द्वयम् अस्ति, तत्र अन्त्यः अच् नकारोत्तरवर्ती अकाररूपः, स च 'अस्' इति समुदायस्य आदिः, अतः 'अस्' इति टिसंज्ञकम्।

वार्तिकम् -

'शकन्ध्वादिषु.' इति। 'शकन्धुः' इत्यादिषु (शकन्ध्वादिगणपठितेषु) टेः पररूपं वक्तव्यम् इति वार्तिकाशयः। अत आह - तच्च टेः इति। अर्थात् पूर्वस्य टेः, परस्य च आदिस्वरस्य, इत्येवं पूर्वपरयोः स्थाने पररूपमेकादेशः भवति इति भावः। तद्यथा - शक+अन्धुः कर्क+अन्धुः इत्यत्र शक इत्यत्र ककारोत्तरवर्ती अकारः टिसंज्ञकः, कर्क इत्यत्रापि तथैव, अत्र अकाररूपात् टेः परः अन्धुः इत्यस्य अकार एव, अतः सवर्णदीर्घः प्राप्तः,

४०. ओमाङोश्च ६।१।९५

ओमि आङि चात्परे पररूपमेकादेशः स्यात्। शिवायोन्नमः। शिव+एहि।

४१. अन्तादिवच्च ६।१।८५

योऽयमेकादेशः स पूर्वस्यान्तवत्परस्यादिवत्। शिवेहि।

तं प्रबाध्य अनेन वार्तिकेन पररूपे शकन्धुः, कर्कन्धुः इति रूपम्। मनस्+ईषा इत्यत्र असः टिसंज्ञकत्वात् ततः परस्य ईकारस्य टेश्च स्थाने पररूपे मनीषा इति रूपम्। अत्र ज्ञेयम्–परस्य यद्रूपं भवति, तस्य एव रूपं पूर्वपरयोः स्थाने भवति, अतः पूर्वस्य रूपम् आत्मानं परस्य रूपे लीनं करोति इति भावः। 'अस्' इति 'ई' इत्यत्र लीनम्, अतः मन् (अस्+ई = ई) षा = मनीषा इति।

आकृतिगणोऽयम् इति –

आकृत्याः स्वरूपेण गण्यते परिचीयते इत्याकृतिगणः। अर्थात् एवंविधाः शब्दाः लोके प्रयुक्ताः सन्तः अत्र गणे निवेशनीयाः इति। मृतम् अण्डं यस्य स मृतण्डः। मृत+अण्डः इत्यत्र प्राप्तसवर्णदीर्घं प्रबाध्य अनेन वार्तिकेन पररूपे मृतण्डः इति रूपम्। मृतण्डस्य अपत्यं पुमान् मार्तण्डः। मृतण्ड शब्दस्य अत्र निवेशः आकृतिगणत्वात् बोध्यः।

रूपलेखनप्रकारः –

कर्कन्धुः – कर्क+अन्धुः इत्यत्र ककारोत्तरवर्तिनः अकारस्य ''अचोऽन्त्यादि टि'' इति सूत्रेण टिसंज्ञायां (स्वस्यैव आदित्वात्) कृतायाम् –-''अकः सवर्णे दीर्घः'' इति सूत्रेण पूर्वपरयोः सवर्णदीर्घे एकादेशेप्राप्ते तं प्रबाध्य टेः 'अन्धु+' इत्यकारस्य स्थाने पररूपे एकादेशे शकन्धुः इति रूपं सिद्धम्। मनस्+ईषा इत्यत्र तु 'अस्' इति टेः ईषा इत्यत्रस्थ'ई'इत्यस्यच स्थाने पररूपे मनीषा इति रूपम्।

अन्यानि उदाहरणानि –

कुल + अटा = कुलटा। सीम + अन्तः = सीमन्त। सार + अङ्ग = सारङ्गः। हल + ईषा = हलीषा। लाङ्गल + ईषा = लाङ्गलीषा। पतत् + अञ्जलिः = पतञ्जलिः इत्यादीनि।

४०. अत्र 'आद्गुणः' इत्यतः आत् इति, 'एङि पररूपम्' इत्यतश्च पररूपम् इति अनुवर्तते। अतः अवर्णात् ओमि आङि च परे पूर्वपरयोः पररूपमेकादेशः स्यादिति सूत्रार्थः। अवर्णात् ओमि परे 'वृद्धिरेचि' इति वृद्धेः प्राप्तिः भवति, सूत्रमेतत् तां वृद्धिं बाधते पररूपञ्च विधत्ते।

रूपलेखनप्रकारः –

शिवाय+ओम् नमः इत्यत्र वृद्धिसंज्ञायां ''वृद्धिरेचि'' इति सूत्रेण पूर्वपरयोः अकार–ओकारयोः स्थाने वृद्ध्येकादेशे प्राप्ते तं प्रबाध्य ''ओमाङोश्च'' इति सूत्रेण पररूपे ओकारादेशे कृते शिवायोम् नमः इति स्थिते ''मोऽनुस्वारः'' इति सूत्रेण मस्य अनुस्वारे शिवायों नमः इति जाते ''अनुस्वारस्य ययि परसवर्णः'' इति सूत्रेण अनुस्वारस्य परसवर्णे नकारे कृते शिवायोन्नमः इति रूपं सिद्धम्।

शंका – शिव+आ+इहि इत्यत्र ''शिव+आ'' इति अकार–आकरयोः 'अकः सवर्णे दीर्घः'' इति सूत्रेण सवर्णदीर्घे प्राप्ते ''आ+इहि'' इत्यत्र च ''आद्गुणः'' इति सूत्रेण आकार–इकारयोः स्थाने गुणैकादेशे च प्राप्ते द्वयोः कतरत् कार्यं प्रथमं विधेयमिति जिज्ञासायां ''धातूपसर्गयोः कार्यमन्तरङ्गम्'' इति परिभाषया अत्र गुणस्य धातूपसर्गसम्बन्धि कार्यत्वात् अन्तरङ्गत्वात् प्रथमं गुणे कृते शिव+एहि इत्यत्र वृद्धिः प्राप्ता – अत्र वृद्धिं प्रबाध्य पररूपं यथा स्यात् तथा कर्तुम् उपक्रमते – अन्तादिवच्च – इति

४१. **अन्तादिवत् च।** यः पूर्वपरयोः स्थाने एकादेशः क्रियते, स पूर्वस्य अन्तवत् भवति, परस्य च आदिवत् भवति। यतो हि एकादेशः द्वयोः स्थानिनोः पूर्वपरयोः स्थाने भवति, तत्र एकादेशे पूर्वस्य अन्तिमः भागः, परस्य

४२. **अकः सवर्णे दीर्घः ६/१/१०१**

अकः सवर्णेऽचि परे पूर्वपरयोर्दीर्घ एकादेशः स्यात्। दैत्यारिः। श्रीशः। विष्णूदयः। होतॄकारः।

च आदिभागः मिलित्वा तिष्ठतः। तत्र च एकादेशे सति आवश्कत्वे पूर्वस्य अन्तवद्भावमादाय कार्यं कर्तुं शक्यते, परस्य च आदिवद्भावमादाय अपि कार्यं कर्तुं शक्यम्। यथा शर्कराचूर्णयोः मिश्रणेन निर्मिते मोदके शर्करात्वभावः चूर्णत्वभावश्च भवतः तथैव अत्रापि बोध्यम्। प्रकृतप्रसङ्गे शिव+एहि इत्यत्र 'ए' इति एकादेशः 'आ+इ' इति द्वयोः स्थाने जातः। तत्र च एकादेशे पूर्वभागः 'आ' इति परभागश्च 'इ' इति। सति आवश्यकत्वे एकारे पूर्वस्य 'आ' इत्यस्य अन्तवद्भावः आनेतुं शक्यः ईकारस्य आदिवत्त्वमपि। अत्र पूर्वस्य अन्तवद्भावमादाय आङ्त्वम् आनेतव्यम्। तथा सति शिवाय इति अकारात् परः आङ् उपलभ्यते अतः 'ओमाङोश्च' इति सूत्रेण पररूपे कृते 'शिवेहि' इति रूपम्। इत्थम् अन्तवद्भावेन वृद्धेः बाधः सञ्जातः।

रूपलेखनप्रकारः -

शिवेहि :- शिव+आ+इहि इत्यवस्थायां 'शिव+आ' इत्यत्र ''अकः सवर्णे दीर्घः'' इति सूत्रेण सवर्णदीर्घे एकादेशे प्राप्ते ''आ+इहि'' इत्यत्र च ''आद्गुणः'' इति गुणे प्राप्ते ''धातूपसर्गयोः कार्यमन्तरङ्गम्'' इति परिभाषया अत्र प्रयोगे गुणस्य धातूपसर्गसम्बन्धित्वात् अन्तरङ्गत्वात् प्रथमं तस्मिन् जाते शिव+एहि इति जाते 'वृद्धिरेचि' इति सूत्रेण पूर्वपरयोः वृद्ध्येकादेशे प्राप्ते, तां च वृद्धिं प्रबाध्य ''अन्तादिवच्च'' इति सूत्रेण एहि इत्यत्र एकाररूपैकादेशे पूर्वान्तवद्भावेन आङ्त्वमादाय 'ओमाङोश्च'' इति सूत्रेण पररूपे कृते 'शिवेहि' इति रूपं सिद्धम्।

४२. अक् इति प्रत्याहारः। अ इ उ ऋ ऌ इति तत्र वर्णाः। एभ्यः वर्णेभ्यः सवर्णेषु स्वरेषु अर्थात् अ इ उ ऋ ऌ इत्येतेषु एव परेषु पूर्वपरयोः स्थाने सवर्णः दीर्घः एकादेशः भवति। अकारात् अकारे परे, इकारात् इकारे, उकारात् उकारे, ऋकारात् ऋकारे, ऌकारात् ऌकारे च परे, इति यावत्। एते अत्र सवर्णान् ग्राहयन्ति अविधीयमानत्वात्। अतः ऋकारऌकारयोः सावर्ण्यात् ऋकारात् ऌकारे परेऽपि सवर्णदीर्घः ॠकारः भवति, दीर्घऌकारस्तु न, तस्य दीर्घत्वाभावात्।

उदाहरणस्य विश्लेषणम् -

दैत्य + अरिः, श्री + ईशः, विष्णु + उदयः इत्यत्र अकार-ईकार-उकारेभ्यः अग्रे तत्तत्सवर्णिनः एव स्वराः सन्ति, अतः पूर्वपरयोः सवर्णदीर्घ एकादेशः अत्र भवति, दैत्यारिः, श्रीशः, विष्णूदयः, इति। होतृ+ऌकारः इत्यत्र ऋकारात्परः सवर्णी ऌकारः विद्यते, ऌकारस्तु दीर्घो भवत्येव नहि, अतः सवर्णदीर्घत्वेन ॠकार एव भवति होतॄकारः इति।

रूपलेखनप्रकार :-

दैत्यारिः = दैत्य+अरिः इत्यत्र ''अकः सवर्णे दीर्घः'' इति सूत्रेण पूर्वपरयोः स्थाने आकाररूपसवर्णदीर्घे एकादेशे कृते 'दैत्यारिः' इति रूपं सिद्धम्।

अन्यानि उदाहरणानि :-

क्रमशः विद्या+आलयः = विद्यालयः, देव+आलयः = देवालयः, कपि+ईशः = कपीशः, रवि+इन्द्रः = रवीन्द्रः, भानु+उदयः = भानूदयः, पितृ+ऋकारः = पितॄकारः इत्यादीनि।

४३. एङः पदान्तादति ६/१/१०९

पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात्। हरेऽव। विष्णोऽव।

४४. सर्वत्र विभाषा गोः ६/१/११२

लोके वेदे चैङन्तस्य गोरति वा प्रकृतिभावः पदान्ते। गो अग्रम्, गोऽग्रम् एङन्तस्य किम् ? चित्रग्वग्रम्। पदान्ते किम् ? गोः।

---

४३. **एङः पदान्तात् अति** इतिच्छेदः। 'अति' इति कृततपरस्य अकारस्य सप्तम्येकवचनम्। तपरत्वात् समकालस्यैव ग्रहणात् अत् इत्यस्य ह्रस्वः अकारः इत्यर्थः। पदान्तात् एङः अर्थात् पदान्ते स्थितात् एङः (एओ) ह्रस्वे अकारे परे पूर्वरूपमेकादेशः भवति, न तु अयादेशः अवादेशश्च।

उदाहरणस्य विश्लेषणम् -

हरे+अव, विष्णो+अव इत्यत्र 'हरे' 'विष्णो' इति सम्बोधनान्तपदद्वयम् एङन्तमस्ति, अस्माच्च पदान्तादेङः अव इति ह्रस्वः अकारः परः विद्यते। अत्र प्राप्तम् 'एचोऽयवायावः' इति सूत्रं प्रबाध्य पूर्वपरयोः पूर्वरूपमेकादेशः अनेन विधीयते, अतः हरेऽव, विष्णोऽव इति स्थितिः।

रूपलेखनप्रकारः -

हरे+अव इत्यत्र 'एचोऽयवायावः'' इति सूत्रेण अचि परे एकारस्य अयादेशे प्राप्ते तं प्रबाध्य ''एङः पदान्तादति'' इति सूत्रेण पूर्वपरयोः 'ए-अ' इत्यनयोः स्थाने पूर्वरूपैकादेशे कृते हरेऽव इति रूपं सिद्धम्।

अन्यानि उदारहणानि -

रामो+अस्मि = रामोऽस्मि। शिवो + अर्च्यः = शिवोऽर्च्यः। ग्रामे + अस्मिन् = ग्रामेऽस्मिन्। कृते + अपि = कृतेऽपि इत्यादीनि।

४४. पदान्ते विद्यमानस्य एङन्तस्य गोशब्दस्य ह्रस्वे अकारे परे (अति परे) विकल्पेन प्रकृतिभावः भवति अर्थात् न किमपि सन्धिकार्यं विकाररूपं भवति। यथा प्रकृतिः तथैव तिष्ठति इत्यर्थः। अर्थात् 'एङः पदान्तादति' इत्यस्य अपवादरूपम् इदम्। सर्वत्र अर्थात् लौकिके संस्कृते वैदिके च।

उदाहरणविश्लेषणम् :-

गो + अग्रम् इत्यत्र अवादेशं प्रबाध्य ''एङःपदान्तादति'' इति सूत्रेण पूर्वरूपस्य प्राप्तिः, गोशब्दस्य एङन्तत्वात्। अनेन सूत्रेण एङन्तस्य गोशब्दस्य विषये अति परे विकल्पेन विशेषकार्यं प्रकृतिभावात्मकं क्रियते। अतः गो अग्रम् इति रूपम्। यत्र पक्षे प्रकृतिभावः न विहितः तत्र पूर्वरूपमेकादेशः अतः 'गोऽग्रम्' इति द्वितीयं रूपम्।

अत्र प्रश्नः -

एङन्तस्य किम्? अर्थात् गोशब्दस्य स्वभावतः एङन्तत्वात् सिद्धे कार्ये किमर्थम् 'एङन्तस्य' इति गोशब्दविशेषणम् ? उत्तरम् - न हि सर्वत्र गोशब्दः एङन्तः। यथा चित्रा गावः अस्य चित्रगुः इति बहुव्रीहिसमासे उकारान्तत्वं प्राप्नोति गोशब्दः। 'एङन्तस्य' इति विशेषणाभावे तु चित्रगु+अग्रम् इत्यत्रापि प्रकृतिभावस्य प्राप्तिः संभवा, गोशब्दत्वात्। सा च न भवेत् एतदर्थम् 'एङन्तस्य' इति विशेषणं कृतम्। सति विशेषणे तु चित्रगुः इत्यस्य एङन्तत्वाभावात् प्रकृतिभावस्य प्राप्तिरेव न भवति। अतः यणि जाते चित्रग्वग्रम् इति रूपं निष्पन्नं भवति।

अपरः प्रश्नः -

पदान्ते इति किम् ? अर्थात् पदान्ते एङन्तस्य गोशब्दस्य इति किमर्थमुच्यते ? उत्तरम् - 'पदान्ते' इति यदि न कथ्येत तर्हि अपदान्तेऽपि एङन्तस्य गोशब्दस्य अति परे प्रकृतिभावापत्तिः स्यात्। यथा-गोशब्दस्य पञ्चम्येकवचने ङसि विभक्तौ गो+अस् इत्यत्रापि अपदान्ते विद्यमानस्य एङन्तस्य गोशब्दस्य ह्रस्वेऽकारे परे पूर्वरूपमेव प्रबाध्य प्रकृतिभावः भवेत्। 'पदान्ते' इति कथिते तु अस्य अपदान्तत्वात् नास्य सूत्रस्यात्र प्रवृत्तिः, अतः

४५. **अनेकाल्शित्सर्वस्य १/१/५५**
इति प्राप्ते।

४६. **ङिच्च १/१/५६**
ङिदनेकालप्यन्त्यस्यैव स्यात्।

४७. **अवङ् स्फोटायनस्य ६/१/१२३**
पदान्ते एङन्तस्य गोरवङ् वाऽचि। गवाग्रम्, गोऽग्रम्। पदान्ते किम्? गवि।

पूर्वरूपे गो: इति निष्पन्नम्।

रूपलेखनप्रकार :-

गोअग्रम्, गोऽग्रम् - गो+अग्रम् इत्यत्र 'एचोऽयवायाव:' इत्यनेन अवादेशे प्राप्ते, तं प्रबाध्य ''एङ: पदान्तादति'' इति सूत्रेण पूर्वरूपे प्राप्ते, तदपि प्रबाध्य ''सर्वत्र विभाषा गो:'' इति सूत्रेण विकल्पेन प्रकृतिभावे कृते गो अग्रम् इति रूपम्। प्रकृतिभावाभावपक्षे तु पूर्वरूपैकादेशे 'गोऽग्रम्' इति रूपं निष्पन्नम्।

४५. **अनेकाल्.** इति। अग्रे ''अवङ् स्फोटायनस्य'' इति सूत्रेण पदान्ते एङन्तस्य गोशब्दस्य अचि परे अवङादेश: विधास्यते। स च अवङादेश: किं सम्पूर्णस्य गोशब्दस्य स्यात् 'अन्त्यस्य वा ? इति प्रश्नं समाधातुं समाधानपरकं किमप्याह - अनेकाल् - इति. अनेक: अल् यस्य स अनेकाल्, शकरावयव: इत् यस्य स शित्। अनेकाल् आदेश:, शिच्च आदेश: यस्य कथित: तस्य सर्वस्य = सम्पूर्णस्य स्थाने भवति। एतद् 'अलोऽन्त्यस्य' इत्यस्य अपवादभूतम् इति फलितम्।

४६. **ङिच्च** - ङकारावयव: इत् यस्य स ङित्। अनेकाल् सन् अपि य आदेश: ङित् (यत्र ङ्वर्णस्य इत्संज्ञा) स आदेश: अन्त्यस्य अल: एव स्थाने स्यात्, न तु अनेकाल्त्वात् सम्पूर्णस्य इति भाव:। एतच्च 'अनेकाल्शित्सर्वस्य' इत्यस्यापवाद:।

४७. स्फोटायन: कश्चित् पाणिने: प्राग्वर्ती वैयाकरणविशेष:। तन्मतानुसारं पदान्ते एङन्तस्य गो: अचि परे विकल्पेन अवङादेश: भवति। 'अवङ्' इत्यत्र 'अव' इति अकारान्तम् अवशिष्यते, ङकारश्च इत्संज्ञक:। अत: अयमादेश: ङिद् अस्ति। अनेकाल् अप्ययं वर्तते। 'अलोऽन्त्यस्य' इत्यनुसारम् अस्य षष्ठीनिर्दिष्टत्वात् (गो: इत्येवम्) गोशब्दावयवस्य अन्त्यस्य अल: ओकारस्य स्थाने स्यात्, किन्तु तदपवादसूत्रम् ''अनेकाल्शित्सर्वस्य'' इति व्यवस्थापयति यदसौ आदेश: अनेकाल् अस्ति, अनेकाल्त्वात् सर्वस्य = सम्पूर्णस्य गोशब्दस्य स्थाने स्यात्। तस्यापि अपवादसूत्रं 'ङिच्च' इति। एतदनुसारम् अनेकाल् सन्नपि -'अवङ्' आदेश: ङित्त्वात् अन्त्यस्य अल: ओकारस्य एव स्यादिति व्यवस्था। अत: गो+अग्रम् इत्यत्र पदान्ते विद्यमानस्य गोशब्दस्य ओकारस्य स्थाने स्फोटायनमते अवङादेशे ग्+अव+अग्रम् इति जाते ''अक: सवर्णे दीर्घ:'' इति सवर्णदीर्घे वर्णसम्मेलने कृते 'गवाग्रम्' इति रूपम्। अवङ: अभावपक्षे ''सर्वत्र विभाषा गो:'' इति सूत्रेण विकल्पेन प्रकृतिभावे 'गो अग्रम्' इति द्वितीयं रूपम्। प्रकृतिभावाभावे ''एङ: पदान्तादति'' इति सूत्रेण पूर्वरूपैकादेशे 'गोऽग्रम्' इति तृतीयं रूपम्।

अन्यानि उदाहरणानि -

(१) गवार्चनम्, गोऽर्चनम्, गो अर्चनम्।
(२) गवावयव:, गोऽवयव:, गो अवयव:।
(३) गो+अक्ष: = गवाक्ष: इत्यत्र विकल्प: नास्ति।

४८. इन्द्रे च ६/१/१२४

गोरवङ् स्यादिन्द्रे। गवेन्द्रः।

४९. दूराद्धूते च ८/२/८४

दूरात् सम्बोधने वाक्यस्य टेः प्लुतो वा।

५०. प्लुतप्रगृह्या अचि नित्यम्। ६/१/१२५

एतेऽचि प्रकृत्या स्युः। आगच्छ कृष्ण३ अत्र गौश्चरति।

५१. ईदूदेद्द्विवचनं प्रगृह्यम् १/१/११

ईदूदेदन्तं द्विवचनं प्रगह्यं स्यात्। हरी एतौ। विष्णू इमौ। गङ्गे अमू।

---

४८. इन्द्रे शब्दे परे पदान्ते गोशब्दस्य अवङ्आदेशः भवति। 'अवङ् स्फोटायनस्य'' इति विकल्पस्य निवृत्त्यर्थं पुनः 'इन्द्रे च' इति सूत्रस्य आरम्भः।

उदाहरणस्य विश्लेषणम् -

गो+इन्द्रः इत्यत्र 'एचोऽयवायावः' इत्यस्य प्राप्तिः आसीत्, तम् अयादेशं प्रबाध्य ''अवङ्स्फोटायनस्य'' इति विकल्पेन 'अवङ्' आदेशे प्राप्ते तमपि प्रबाध्य ''इन्द्रे च'' इति सूत्रेण नित्य अवङ्आदेशे ग्+अव+इन्द्रः इत्यवस्थायां ''आद्गुणः'' इति गुणैकादेशे गवेन्द्रः इति सिद्धम्।

४९. **दूराद्धूते च** - दूरात् हूते च इतिच्छेदः। दूरात् हूते = सम्बोधने यद् वाक्यं तस्य टेः विकल्पेन प्लुतत्वं भवति। तस्य किं फलम् ? इति चेत् - ''प्लुतप्रगृह्या.'' इति वक्ष्यते।

५०. **'प्लुतप्रगृह्या.' इति।** प्लुताः च प्रगृह्याःच प्लुतप्रगृह्याः। ते अचि (स्वरे) परे प्रकृत्या = स्वभावतः यथा सन्ति तथैव तिष्ठन्ति अर्थात् तत्र सन्ध्यादिकार्यं विकारात्मकं न भवति। प्लुतसंज्ञा, प्रगृह्यसंज्ञा च येषां भवति, ते प्लुताः प्रगृह्याश्च।

उदाहरणस्य विश्लेषणम् -

'आगच्छ कृष्ण३ अत्र गौश्चरति' इति वाक्ये 'आगच्छ कृष्ण' इति सम्बोधनवाक्यस्य टेः णकारोत्तरवर्तिन अकारस्य प्लुतसंज्ञा 'दूराद्धूते च' इति सूत्रेण जाता, ततः परः अत्र इति शब्दस्य अच् अकारः स्थितः, 'कृष्ण३ + अत्र' इत्यत्र सवर्णदीर्घस्य प्राप्तिः, किन्तु 'प्लुतप्रगृह्या अचि नित्यम्' इत्यनेन प्रकृतिभावकरणात् न सवर्णदीर्घः।

रूपलेखनप्रकारः -

'आगच्छ कृष्ण३ अत्र गौश्चरति' इत्यत्र सम्बोधने 'आगच्छ कृष्ण' इति वाक्ये ''दूराद्धूते च'' इति सूत्रेण वाक्यस्य टेः (णकारोत्तरस्य अकारस्य) प्लुतसंज्ञायां कृतायां कृष्ण ३ + अत्र इत्यत्र ''अकः सवर्णे दीर्घः'' इति सवर्णदीर्घैकादेशे प्राप्ते तं प्रबाध्य ''प्लुतप्रगृह्या अचि नित्यम्'' इति सूत्रेण प्लुतसंज्ञकस्य प्रकृतिभावे कृते 'आगच्छ कृष्ण३ अत्र॰' इति सिद्धम्।

अन्यानि उदाहरणानि -

आगच्छ प्रभो३ अस्मान् पाहि। शृणु राम३ आश्रमं गच्छाम इत्यादीनि।

५१. ईदन्तम् (ईकारान्तम्) ऊदन्तम् (ऊकारान्तम्) एदन्तम् (एकारान्तम्) यद् द्विवचनं भवति, तस्य प्रगृह्यसंज्ञा स्यात्। द्विवचानन्तम् एव अत्र द्विवचनं ज्ञेयम्।

उदाहरणविश्लेषणम् -

हरी+एतौ, विष्णू+इमौ, गङ्गे+अमू इत्यादिषु हरी इति ईकारान्तं द्विवचनान्तं पदम्, विष्णू इति ऊकारान्तं पदम्, गङ्गे इति एकारान्तं द्विवचनान्तं पदम्। एषाम् प्रगृह्यसंज्ञा भवति। तस्याः फलं तु -''प्लुतप्रगृह्या अचि नित्यम्'' इति प्रकृतिभावः। तेन हरी+एतौ विष्णू+इमौ इत्यत्र यण् न भवति, गङ्गे अमू इत्यत्र अयादेशश्च न भवति। ('हरी' इत्यादौ द्विवचनान्तस्य द्विवचनत्वम् 'अन्तादिवच्च' सूत्रेण परादिवद्भावात् बोध्यम्)

५२. **अदसो मात् १/१/१२**
अस्मात्परावीदूतौ प्रगृह्यौ स्तः। अमी ईशाः। रामकृष्णावमू आसाते। मात् किम् ? अमुकेऽत्र।

५३. **चादयोऽसत्त्वे १/४/५७**
अद्रव्यार्थाश्चादयो निपाताः स्युः।

५४. **प्रादयः १२४/५८,**
एतेऽपि तथा।

रूपलेखनप्रकारः -

हरी+एतौ इत्यत्र ''इको यणचि'' इति सूत्रेण ईकारस्य यण् प्राप्तः, किन्तु ''ईदूदेद्द्विवचनं प्रगृह्यम् ''इति सूत्रेण 'हरी' इति ईकारान्तद्विवचनस्य (द्विवचनान्तस्य) प्रगृह्यसंज्ञायां कृतायां ''प्लुतप्रगृह्या अचि नित्यम्'' इति सूत्रेण प्रकृतिभावे कृते (अतः स्वरसन्धिः यण् न) हरी एतौ इति प्रयोगः साधुः। गङ्गे अमू इत्यत्र अयादेशः प्राप्तः प्रगृह्यत्वात् प्रकृतिभावे स न भवति।

अन्यानि उदाहरणानि -

चक्षुषी एते, गुरू आगच्छतः, नेत्रे इमे, प्रतिष्ठेते एतौ इत्यादीनि।

५२. अदस्शब्दसम्बन्धी यः मकारः, तस्मात् परौ ईदूतौ (ईकार - ऊकारौ) प्रगृह्यसंज्ञकौ भवतः। अत्र ईत्, ऊत् इति पूर्वसूत्रात् अनुवर्तेते, एत् इति तु न अनुवर्तते।

उदाहरणविश्लेषणम् -

अमी इति अदसः पुँल्लिङ्गे प्रथमाबहुवचने, अमू इति द्विवचने रूपम्। अत्र मकारात् परः ईकारः, ऊकारश्च प्रगृह्यसंज्ञकः। ततश्च प्रकृतिभावः भवति। अतः अमी+ईशाः इत्यत्र सवर्णदीर्घैकादेशः, अमू+आसाते इत्यत्र यण् च न भवति।

प्रश्नः - मात् इति ग्रहणं किमर्थम् ? उत्तरम् - 'अमुकेऽत्र' इति। यदि 'मात्' इति ग्रहणं न क्रियेत तदा तु पूर्वसूत्रात् एकारस्यापि अनुवृतिः भवेत्, ततश्च अमुके+अत्र इत्यत्र ककारात् परस्य अदस्शब्दसम्बन्धिनः एकारस्यापि प्रगृह्यसंज्ञा स्यात्, तेन पूर्वरूपं न भवेत्। कृते तु माद्ग्रहणे ततः परस्य एकारस्य असंभवात् अनुवृत्तिः न भवति।

रूपलेखनप्रकारः -

अमी+ईशाः इत्यत्र ''अकः सवर्णे दीर्घः'' इत्यनेन सवर्णदीर्घैकादेशे प्राप्ते तं प्रबाध्य ''अदसो मात्'' इत्यनेन सूत्रेण अदस्सम्बन्धिमकारात्परस्य ईकारस्य प्रगृह्यसंज्ञायां कृतायां ''प्लुतप्रगृह्या अचि नित्यम्'' इति सूत्रेण प्रकृतिभावे कृते अमी ईशाः इति रूपं निष्पन्नम्। एवमेव 'अमू आसाते' इत्यत्र ऊकारस्य प्रगृह्यसंज्ञकत्वात् प्रकृतिभावः। अतः तत्र अचि परेऽपि यण् न भवति।

५३. **चादयः असत्त्वे** इतिच्छेदः। न सत्त्वम् असत्त्वम्। सत्त्वं = द्रव्यम् (यत्र लिङ्गस्य संख्यायाः कारकस्य च प्रतीतिः भवेत् तद् द्रव्यम्) असत्त्वम् = अद्रव्यम् तस्मिन् असत्त्वे। अर्थात् अद्रव्यार्थे विद्यमानाः च, वा इत्यादयः निपातसंज्ञकाः भवन्ति। द्रव्यम् अर्थः येषां न भवति, ते अद्रव्यार्थाः इति भावः।

५४. अद्रव्यार्थाः प्रादय अपि निपातसंज्ञकाः भवन्ति। प्रादयः द्वाविंशतिसंख्याकाः ''उपसर्गाः क्रियायोगे'' इति सूत्रे उल्लिखिताः। अतः तत्र द्रष्टव्याः।

५५. निपात एकाजनाङ् १/१/१४

एकोऽज् निपात आङ्वर्जः प्रगह्यः स्यात्। इ इन्द्रः। उ उमेशः। 'वाक्यस्मरणयोरङित्' । आ एवं नु मन्यसे । आ एवं किल तत् । अन्यत्र ङित्, आ ईषद् उष्णम् ओष्णम्।

५६. ओत् १/१/१५

ओदन्तो निपातः प्रगृह्यः स्यात्। अहो ईशाः।

---

५५. एकश्चासौ अच् इति एकाच् इति कर्मधारयः, न तु एकः अच् अस्मिन् इति बहुव्रीहिः। न आङ् इति अनाङ् = आङ्भिन्नः। आङ्भिन्न एकाज् निपातः

प्रगृह्यसंज्ञकः भवति। आङ्वर्जः = आङ्भिन्नः आङं वर्जयित्वा इत्यर्थः। आङ् इति निपातस्य प्रगृह्यसंज्ञा न भवति इति फलितार्थः।

उदाहरणस्य विश्लेषणम् –

'इ' इति विस्मयार्थकः एकाज् निपातः। 'उ' इति वितर्के अर्थे विद्यमान एकाज् निपातः। एतौ आङ्भिन्नौ स्तः। अतः अनयोः प्रगृह्यसंज्ञा भवति। प्रगृह्यत्वात् प्रकृतिभावः भवति, अतः 'इ इन्द्रः' 'उ उमेशः' इत्यत्र सवर्णदीर्घैकादेशः न भवति।

रूपलेखनप्रकारः –

'इ इन्द्रः' इत्यत्र 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे एकादेशे प्राप्ते 'इ' इत्यस्य निपातस्य एकाच्त्वात् आङ्भिन्नत्वात् च ''निपात एकाजनाङ्'' इति सूत्रेण प्रगृह्यसंज्ञायां कृतायां ''प्लुतप्रगृह्या अचि नित्यम्'' इति सूत्रेण प्रकृतिभावे इ इन्द्रः इति सिद्धम्। एवमेव 'उ उमेशः' इत्यपि ज्ञेयम्।

विशेषः –

आङ्, आ च इति द्वौ भिन्नौ निपातौ स्तः। उभयत्रापि 'आ' इत्येव शिष्यते। तत्र आङः प्रगृह्यसंज्ञा न भवति, ङकाररहितस्य (अङितः) तु भवति। तत्र प्रयोगेषु कुत्र 'आङ्' इत्यस्य ङकारानुबन्धकस्य आ भवति, कुत्र च शुद्धस्य 'आ' इति निपातस्य आ इति, सन्देहः भवति, तं सन्देहं निराकर्तुम् उच्यते – 'वाक्यस्मरणयोरङित्' इति भाष्यवचनम्। अर्थात् वाक्ये स्मरणे च ङिद्भिन्नः भवति। अतः तस्य तु प्रगृह्यसंज्ञा भवति, प्रकृतिभावश्चापि भवति। अन्येषु अर्थेषु यथा – ईषदर्थे, क्रियायोगे, मर्यादार्थे अभिविधौ च प्रयुक्तः 'आ' तु ङिदेव। अतः तस्य प्रगृह्यसंज्ञा न भवति ततः प्रकृतिभावः अपि न। यथा आ उष्णम् = ओष्णम् इत्यत्र प्रगृह्यत्वस्य प्रकृतिभावस्य च अभावात् गुणः भवति। अत्र 'आ' इति ईषदर्थे ङिदस्ति। ''आ एवं नु मन्यसे'' ''आ एवं किल तत्'' इत्यत्र क्रमशः वाक्ये स्मरणे च प्रयुक्तः 'आ' इति निपातः अङिदस्ति। अतः प्रगृह्यत्वात् प्रकृतिभावे सति आ + एवम् इत्यत्र वृद्धिः न भवति इति विवेकः।

५६. ओकारान्तः निपातः प्रगृह्यसंज्ञकः भवति। अहो, अथो इत्यादीनाम् निपातानाम् अनेकाच्त्वात् पूर्वेण अप्राप्ता प्रगृह्यसंज्ञा अनेन क्रियते।

उदाहरणस्य विश्लेषणम् –

'अहो' इति ओकारान्तः निपातः। अस्य च प्रगृह्यसंज्ञा भवति, तस्मात् प्रकृतिभावः। अतः अहो ईशाः इत्यत्र अवादेशः न भवति। यदि प्रगृह्यसंज्ञा न अभविष्यत् तदा तु अवादेशः एवाभविष्यत्।

रूपलेखनप्रकारः –

अहो + ईशाः इत्यत्र ''एचोऽयवायावः'' इति सूत्रेण अचि परे ओकारस्य अवादेशः प्राप्तः किन्तु 'अहो' इत्यस्य ओकारान्त – निपातत्वात् ''ओत्'' इति सूत्रेण प्रगृह्यसंज्ञायां कृतायां ''प्लुतप्रगृह्या अचि नित्यम्'' इति सूत्रेण प्रकृतिभावे कृते अहो+ईशाः इति रूपं निष्पन्नम्।

५७. **सम्बुद्धौ शाकल्यस्येतावनार्षे १/१/१६**

सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवैदिके इतौ परे। विष्णो इति, विष्ण इति, विष्णविति।

५८. **मय उञो वो वा ८/३/३३**

मयः परस्य उञो वो वा अचि। किम्वुक्तम्, किमु उक्तम्।

अन्यानि उदाहरणानि -

अथो+अपि = अथो अपि इति। अत्र अथो इति मङ्गलार्थकः ओदन्तः निपातः। मिथो+एतौ = मिथो एतौ इति। अत्र मिथो इति सहार्थे ओदन्तः निपातः।

अत्रावधेयम् -

अथो अथ इति द्वौ भिन्नौ निपातौ समानार्थकौ स्तः। मिथो मिथस् एतौ अपि तथैव समार्थकौ द्वौ निपातौ स्तः।

सम्बुद्धिनिमित्तकः ओकारः णकारोत्तरवर्ती अस्ति, तस्य ओकारस्य प्रगृह्यसंज्ञा भवति, यतो हि ततः परः इतिशब्दः विद्यते। न चायम् इतिशब्दः वेदसम्बन्धी। इत्थं शाकल्यमते प्रगृह्यत्वात् प्रकृतिभावे 'विष्णो इति' एतत् प्रथमं रूपम्। पाणिनिमते तु अवादेशेः विष्णव्+इति इत्यवस्थायां ''लोपः शाकल्यस्य'' इति वैकल्पिके वलोपे 'विष्ण इति' इति द्वितीयं रूपम्। वस्य लोपाभावे तु विष्णविति इति रूपं तृतीयम्।

रूपलेखनप्रकारः -

विष्णो इति, विष्ण इति, विष्णविति - विष्णो + इति इत्यत्र 'एचोऽयवायावः' इति सूत्रेण अवादेशे प्राप्ते ''सुम्बुद्धौ शाकल्यस्येतावनार्षे'' इति सूत्रेण णकारोत्तरवर्तिन ओकारस्य सम्बुद्धिनिमित्तकत्वात् विकल्पेन प्रगृह्यसंज्ञायां कृतायां, ''प्लुतप्रगृह्या अचि नित्यम्'' इति सूत्रेण प्रकृतिभावे विष्णो इति प्रथमं रूपम्। प्रगृह्यत्वाभावपक्षे अवादेशे विष्णव्+इति इत्यवस्थायां ''लोपः शाकल्यस्य'' इति सूत्रेण विकल्पेन वकारस्य लोपे विष्ण इति इति द्वितीयं रूपम्। (अत्र गुणस्तु न, वलोपस्य त्रैपादिकत्वात् गुणविधायकं प्रति असिद्धत्वात्)। वलोपाभावपक्षे तु विष्णविति इति तृतीयं रूपं सिद्धम्।

अन्यानि उदाहरणानि -

भानो इति, भान इति, भानविति। शम्भो इति, शम्भ इति, शम्भविति। गुरो इति, गुर इति, गुरविति। मनो इति, मन इति, मनविति इत्यादीनि।

५७. सम्बुद्धौ शाकल्यस्य + इतौ + अनार्षे इतिच्छेदः। ऋषिशब्दः वेदार्थकः अपि। ऋषिसम्बन्धी आर्षः अर्थात् वैदिकः। वेदसम्बन्धी इत्यर्थः। न आर्षः अनार्षः अर्थात् अवैदिकः। य वेदसम्बन्धी न भवति स इति भावः। 'इतौ' इतिशब्दस्य सप्तम्येकवचने रूपम्। परसप्तमी इयम्। सम्बुद्धिः सम्बोधने प्रथमैकवचनम्। सम्बुद्धिः निमित्तमस्य, सम्बुद्धिनिमित्तकः। तादृशः य ओकारः स विकल्पेन प्रगृह्यसंज्ञकः भवति, अवैदिके इतिशब्दे परे।

उदाहरणस्य विश्लेषणम् -

'विष्णो इति' इत्यत्र 'विष्णो' इति सम्बोधने एकवचनस्य रूपम्। अत्र

५८. मय् इति प्रत्याहारः, तत्र म ङ ण न झ भ घ ढ ध ज ब ग ड द ख फ छ ठ थ च ट त क प इति वर्णाः। मयः परस्य उञ् (उ) इति एकाचः निपातस्य विकल्पेन व् इत्यादेशः भवति अचि परे सति। 'निपात एकाजनाङ्' इति प्रगृह्यत्वात् प्रकृतिभावे प्राप्ते, यणः अप्राप्तौ इदं वचनम्।

रूपलेखनप्रकारः -

किम् उ उक्तम् इत्यत्र ''इको यणचि'' इत्यनेन उकारस्य यणि प्राप्ते तत्प्रबाध्य ''निपात एकाजनाङ्'' इति सूत्रेण 'उ' इति निपातस्य प्रगृह्यसंज्ञायां 'प्लुतप्रगृह्या अचि नित्यम्' इति सूत्रेण प्रकृतिभावे च प्राप्ते ''मय उञो वो वा'' इत्यनेन सूत्रेण 'उ' इत्यस्य विकल्पेन 'व्' आदेशे किम्वुक्तम् इति रूपम्। वादेशाभावे प्रकृतिभावे किमु उक्तम् इति रूपं द्वितीयम्।

५९. इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ६/१/१२७

पदान्ता इको ह्रस्वा वा स्युरसवर्णेऽचि। ह्रस्वविधिसामर्थ्यान्न स्वरसन्धि:। चक्रि अत्र, चक्र्यत्र। पदान्ता इति किम् ? गौर्यौ।

६०. अचो रहाभ्यां द्वे ८/४/४६

अच पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्त:। गौर्य्यौ। (न समासे)। वाप्यश्व:।

---

५९ पदान्ता: इ उ ऋ लृ इति वर्णा: (इक:) असवर्णे अचि परे शाकल्यस्य मते विकल्पने ह्रस्वा: भवन्ति। एते वर्णा: सवर्णान् ग्राहयन्ति, अविधीयमानत्वात्।

उदाहरणस्य विश्लेषणम् -

'चक्री+अत्र' इत्यत्र 'चक्री' इति पदम्। अत्र पदान्त: वर्ण: 'ई' विद्यते, स च इगन्तर्गत:। तस्माच्च ईकारात्पर: 'अत्र' इत्यस्य घटक: अकार:, स च अकार: ईकारस्य असवर्ण: अच् वर्तते। अत: अत्र पदान्तात् इक: पर: असवर्ण: अच् विद्यते इति कृत्वा ईकारस्य ह्रस्वत्वं भवति चक्रि+अत्र इति जातम्। कृते ह्रस्वे यण् तु न भवति, ह्रस्वविधिसमर्थ्यात्। कृते यणि तु ह्रस्वत्वकरणमेव व्यर्थं स्यात् इति भाव:। पाणिनिमते तु ह्रस्वत्वं न भवति, तत्र पक्षे यणेव स्यात् अत: चक्र्यत्र इति द्वितीयं रूपं भवति।

रूपलेखनप्रकार: -

चक्री+अत्र इत्यत्र ''इको यणचि'' इति सूत्रेण ईकारस्य स्थाने यण्त्वेन यकारे प्राप्ते ''इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च'' इति सूत्रेण विकल्पेन पदान्तस्य ईकारस्य ह्रस्वत्वे कृते चक्रि अत्र इति प्रथमं रूपम्। ह्रस्वत्वाभावपक्षे यणि कृते 'चक्र्यत्र' इति द्वितीयं रूपं सिद्धम्। कृते ह्रस्वे ह्रस्वत्वविधि सामर्थ्यात् यण् न भवति, तथा सति ह्रस्वत्वस्य वैयर्थ्यापत्ते:।

प्रश्न: -

अत्र पदान्ता: इक: इति किमर्थमुक्तम् ? इति प्रश्ने - गौर्यौ इति उत्तरम्। अर्थात् यदि पदान्ता: इति विशेषणं नोच्येत तर्हि अपदान्तस्यापि इक: ह्रस्वत्वापत्ति: आपतेत्। तथा सति गौरी + औ इत्यत्र अपदान्तस्य ईकारस्य ह्रस्वत्वे सति तद्विधिसामर्थ्यात् यणेव न स्यात् ततश्च गौर्यौ इति रूपं न सिद्ध्येत् इति भाव:।

अन्यानि उदाहणानि -

दण्डी + आह = दण्डि आह, दण्ड्याह। ज्ञानी + आगत: = ज्ञानि आगत:, ज्ञान्यागत:। बली + ऋक्ष: = बलि ऋक्ष:, बल्यृक्ष:। तेजस्वी + आगच्छति = तेजस्वि आगच्छति, तेजस्व्यागच्छति। धनी + ऐच्छत् = धनि + ऐच्छत्, धन्यैच्छत् इत्यादीनि।

६०. अत्र 'यर्' इति 'वा' इति च पदद्वयं ''यरोऽनुनासिकेऽनुनासिको वा'' इति सूत्रात् अनुवर्तते। अच: इति पञ्चम्येकवचनं, 'रहाभ्याम्' इति पञ्चमीद्विवचनान्तम्। अत: अच: परौ यौ रेफहकारौ स्त:, ताभ्यां रेफहकाराभ्यां (रेफात् हकारात् इति प्रत्येकस्मात्) पर: यर् (य व र ल ञ म ङ ण न झ भ घ ढ ध ज ब ग ड द ख फ छ ठ थ च ट त क प श ष स इत्येते वर्णा: अर्थात् हकारं परित्यज्य सर्वे व्यञ्जनवर्णा:) द्वित्वं प्राप्नोति विकल्पेन।

उदाहरणस्य विश्लेषणम् -

गौरी+औ इत्यत्र ''इको यणचि'' इति सूत्रेण ईकारस्य यण्त्वेन यकारे कृते गौर् + य् + औ इत्यवस्थायाम् गकारोत्तरवर्तिन औकारात् पर: रेफ:, तस्माच्च रेफात् पर: यर् यकार: अस्ति, तस्य विकल्पेन द्वित्वं भवति अत: गौर् य् य् औ = 'गौर्य्यौ' इति रूपम्। यत्र द्वित्वं न भवति, तस्मिन् पक्षे एकयकाररूपं गौर्यौ इति रूपम्।

६१.   **ऋत्यकः ६/१/१२८**

ऋति परे पदान्ता अकः प्राग्वद् वा। ब्रह्म ऋषिः, ब्रह्मर्षिः। पदान्ताः किम्? आर्च्छत्।

इत्यच्सन्धिः

रूपलेखनप्रकारः -

गौर्य्यौ, गौर्यौ - गौरी + औ इत्यत्र ''इको यणचि'' इति सूत्रेण ईकारस्य स्थाने यण्त्वेन यकारे कृते गौर्य् औ इत्यवस्थायाम् ''अचो रहाभ्यां द्वे'' इति सूत्रेण अचः परस्मात् रेफात् परस्य यकारस्य (यरः) विकल्पेन द्वित्वे गौर् य् य् औ वर्णसम्मेलने गौर्य्यौ इति प्रथमं रूपम्। द्वित्वाभावे गौर्यौ इति द्वितीयं रूपं निष्पन्नम्।

वार्तिकम् -

(न समासे) ''इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च'' इति सूत्रेण पदान्तस्य इकः यत् ह्रस्वत्वं भवति, तत् समासे स्थितस्य इकः न भवति। यथा वाप्यश्वः इति रूपम्। वाप्याम् अश्वः = वाप्यश्वः इति सप्तमीतत्पुरुषः। अत्र समासे ईकारान्तं 'वापी' इति पदं ह्रस्वं न भवति, अतः यणि सति एकमेव रूपम्। समासेऽपि सति ह्रस्वे तु रूपद्वयं स्यात्।

अन्यानि उदाहरणानि -

द्वित्वस्य - शर्म्मा, शर्मा। कर्त्ता, कर्ता इत्यादीनि। (न समासे) इत्यस्य तु - सूच्यग्रम्, भवान्यात्मजः, वध्वागतम् इत्यादीनि।

६१.   **ऋति** + **अकः** इतिच्छेदः। पदान्ताः अकः ऋति (ह्रस्वे ऋकारे) परे विकल्पेन ह्रस्वाः भवन्ति। अत्र अकः इति अविधीयमानत्वात् सवर्णान् ग्राहयन्ति इति ज्ञेयम् अन्यथा तु वर्णसमाम्नाये दीर्घाणाम् अभावात् ह्रस्वत्वविधानमेव व्यर्थं स्यात्।

उदाहरणस्य विश्लेषणम् -

ब्रह्मा + ऋषिः इत्यत्र 'ब्रह्मा' इत्यत्र पदान्तः 'आ' इति अक् अस्ति। अस्माच्च परः 'ऋषि' इत्यस्य ऋकारः। तस्मिन् ऋकारे (ह्रस्व-ऋकारे) परे पदान्तस्य अकः = आकारस्य विकल्पेन ह्रस्वत्वं विधीयते। यत्र ह्रस्वविधिः जातः, तत्पक्षे स्वरसन्धिः (गुणः) न भवति।

रूपलेखनप्रकारः -

ब्रह्मा + ऋषिः इत्यत्र ''आद्गुणः'' इति सूत्रेण पूर्वपरयोः गुणैकादेशे प्राप्ते ''ऋत्यकः'' इति सूत्रेण पदान्तस्य = आकारस्य विकल्पेन ह्रस्वत्वे ब्रह्म ऋषिः इति रूपम्। सति च ह्रस्वे तत्र न गुणः, ह्रस्वविधि सामर्थ्यात्। ह्रस्वत्वाभावपक्षे ब्रह्मा+ऋषिः इत्यत्र आन्तरतम्यात् अकाररूपे गुणैकादेशे ''उरण् रपरः'' इति सूत्रेण रपरत्वे च कृते ब्रह्म् + अर् + षिः इत्यवस्थायां वर्णसम्मेलने जलतुम्बिकान्यायेन रेफस्य ऊर्ध्वगमने ''ब्रह्मर्षिः'' इति द्वितीयं रूपम्।

प्रश्न :-

अत्र पदान्ताः अकः इति किमर्थम् उक्तम् ? उत्तरम् - यदि पदान्ताः इति नोच्यते तर्हि अजादेः धातोः विधीयमानस्य आडागमस्य अपि 'आ + ऋच्छत्' इत्यत्र ह्रस्वत्वं स्यादिति भावः। तथा सति 'आर्च्छत्' इति रूपं न स्यात्।

अन्यानि उदाहरणानि -

पूषा+ऋच्छति :- पूष ऋच्छति, पूषर्च्छति इत्यादीनि।

इति अच्सन्धिः समाप्तः।

अभ्यासार्थं प्रश्नाः

वस्तुनिष्ठप्रश्नाः –

१. इकः स्थाने यण् भवति :

(क) अणि परे | (ख) अचि परे
(ग) अलि परे | (घ) हलि परे ( )

२. षष्ठीनिर्दिष्टः आदेशः ....अलःस्थाने भवति –

(क) आदेः | (ख) मध्यस्थस्य
(ग) अन्त्यस्य | (घ) सर्वस्य ( )

३. कपये (कपे + ए) इति उदाहरणम् अस्ति –

(क) यण्सन्धेः | (ख) सवर्णदीर्घसन्धेः
(ग) अयादिसन्धेः | (घ) पूर्वरूपसन्धेः ( )

४. गङ्गौघः इत्यत्र सन्धिरस्ति –

(क) गुणः | (ख) वृद्धिः
(ग) पररूपम् | (घ) अयादिः ( )

५. उपदेशे .... अचः इत्संज्ञा भवति –

(क) अन्त्यस्य | (ख) अनुनासिकस्य
(ग) आदेः | (घ) अननुनासिकस्य ( )

६. 'आ ऐ औ' इति वर्णानां संज्ञा भवति –

(क) गुणः | (ख) वृद्धिः
(ग) ऊष्मसंज्ञा | (घ) टि ( )

७. प्रादयः उपसर्गसंज्ञकाः भवन्ति –

(क) धातुयोगे | (ख) क्रियायोगे
(ग) प्रत्यययोगे | (घ) पदयोगे ( )

८. असत्त्वे चादयः भवन्ति –

(क) निपातसंज्ञकाः | (ख) गतिसंज्ञकाः
(ग) उपसर्गसंज्ञकाः | (घ) कर्मप्रवचनीयसंज्ञकाः ( )

लघूत्तरात्मकाः प्रश्नाः –

९. 'इको यणचि' इति सूत्रार्थं विलिख्य उदाहरणानि लेख्यानि।
१०. 'तपरस्तत्कालस्य' इति सूत्रार्थं स्पष्टयत।
११. वृद्धिसंज्ञाविधायकं सूत्रं विलिख्य 'वृद्धिरेचि' इति सूत्रं सोदाहरणं वर्णयत।
१२. पररूपसन्धिः कुत्र भवति ? इति विलिख्य 'प्रेजते' इति रूपं साधयत।
१३. कियन्तः उपसर्गाः ? तेषां नामानि लिखत।
१४. सवर्णदीर्घैकादेशः कस्याम् अवस्थायां सम्भवति।
१५. मध्वरिः, कृष्णर्द्धिः, प्रष्ठौहः, विष्णोऽव, इ इन्द्रः, चक्रि अत्र, ब्रह्मर्षिः एषु चत्वारः प्रयोगाः साध्याः।